શ્રી નેમિ-વિજ્ઞાન-કસ્તૂર-ચંદ્ર-૨૧૬ ગુરૂભ્યો નમઃ

પોથી નં ૧૨૮૫
ક્રમાંક-૨૪૯૫
પાનાં ૧૧૯

॥ ॐ अर्हं श्री पञ्चपरमेष्टिभ्यो नमोनमः ॥

॥ सर्वगुण संयुक्ताय सर्वदोषप्रमुक्ताय श्री महावीर स्वामिने नमोनमः ॥

॥ अनंतलब्धिनिधानाय श्री गौतमस्वामिने नमोनमः ॥

॥ षट् त्रिंशत्सूरिगुणभूषिताय शासन प्रभावकाय श्री आर्यरक्षितसूरीश्वराय नमोनमः ॥

श्री विधिपक्ष (अचल) गच्छ मुनिमंडलाधीश्वरस्य पवित्र चारित्रस्य सुविहितशिरोमणेः कच्छ हालार देशोद्धारकस्य परमपूज्यस्य श्री गौतमसागर मुनीश्वरस्य शिष्यस्य सुविशुद्ध चारित्रस्य शान्तमूर्तेः श्री नीतिसागर मुनीश्वरस्य शिष्येण विद्वद्वर्येण श्री गुणसागर गणिवरेणरचितम्.

# श्री श्रीपाल चरित्रम्

## श्री परम पूज्य विधिपक्षगच्छ मुनिनायक श्री गौतमसागरजि महाराजोपदेशेन

प्रकाशकः—स्वपितृमेघजिद्देवसिंह स्वमातृ लाधीबाई स्मरणार्थं कच्छ वीढवास्तव्यः शाह कल्याणजिन्मेघजिद्.

वीर सं. २४७६ प्रथमावृत्तिः प्रतयः २५० विक्रम सं. २००६

मुद्रकः—शाह जेसिंगभाइ हीरालाल हंसराज. जैन भास्करोदय प्रीन्टींग प्रेस, जामनगर.

प्रत १२८५ क्र. २७५५

॥ ॐ श्री अर्हं नमः ॥

॥ उपाध्यायश्रीगुणसागरगणिविरचितम् ॥

# ॥ श्रीपालचरित्रम् ॥

श्रीपार्श्वं घृतकल्लोलं, संपत्करं विपद्धरम्। कच्छस्थसुथरीतीर्थे, रम्यप्रासादसंस्थितम् ॥१॥
नत्वा श्रीसिद्धचक्रं च, समग्रसिद्धिदं वरम्। प्रगुरुं गौतमांबुधिं, पवित्रं मुनिनायकम् ॥२॥
मद्गुरुं नीतिपाथोधिं, सौम्यं शान्तं प्रणम्य च। श्रीपालचरितं वक्ष्ये, यथा प्राग् मुनिदर्शितम् ॥३॥

श्रीजम्बूद्वीपस्य दक्षिणार्द्धभरते मध्यखण्डे श्रीवीरविभोः शासनोत्पत्तिस्थानात्तीर्थस्वरूपे विश्वविख्याते प्रभूतसमृद्धिसमृध्धे मगधाभिधदेशे समृद्धयाधरीकृतेन्द्रपुरं बहुसज्जनकृतवासं राजगृहं नाम नगरमस्ति. तत्र



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्रीजिनदेवसद्गुरुचारित्रादिप्रवरभक्तिसमार्जितजिननामकर्माऽनेकगुणगणालंकृतः श्रेणिकाभिधानः पृथ्वीपतिर्न्यायधर्मेण प्रजावत्प्रजाः पालयतिस्म तस्य नन्दाभिधाया आद्यवलभायाश्चतुर्बुद्धिनिधिर्गुणालयो धर्मकार्यपरोऽभयकुमारनामा सुविनीतःसुत आसीच्चेटकधरापपुत्रीचेल्लणाह्वद्वितीयभार्यायाश्चाऽशोकचन्द्रहल्लविहल्ला ह्वयास्त्रयः सुताःसंजातास्तस्य नृपस्यान्येऽपि धारिणीप्रमुखराज्ञीभ्यः संजाता बुद्धिमन्तो न्यायधर्मरक्ता मेघकुमाराद्याः सूनव आसन्। अभयकुमारकृतसाहाय्यःस भूपःसुखेन राज्यं धर्मं च पालयन् तिष्ठति.

अन्यदा तन्नगरसमीपनगरेग्रामादुग्रामं विहरन् पृथ्वीपीठंपावयन् भव्यान् प्रतिबोधयन् त्रिदशनरनाथपूजितः श्रीवीरजिनवरः समवसृतस्ततः प्रभुणा राजगृहजनलाभार्थं प्रेषितःप्रथमगणाधिपो गुणलब्धिनिधानो मुनि परिवृतः श्रीगौतमस्वामी राजग्रहोद्यानं समागात्। उद्यानपालकेन नृपाय वर्द्धापनिका दत्ता. संतुष्टेन नृपेण तस्मै प्रीतिदानं दतं ततः सपौरपरिवारो धरापो महद्धर्योद्यानं गत्वा पंचाऽभिगमपूर्वकं त्रिःप्रदक्षिणीकृत्य भक्त्या सपरिवारं श्रीगौतमंप्रणम्योचितस्थान उपविष्टः परोपकारपरेण श्रीगौतमस्वामिना मेघगंभीरध्वनिना देशना प्रारब्धा तथाहि—भो भव्यप्राणिनः सुक्षेत्रकुलादिसुदुर्लभसामग्रीयुतं सुदुर्लभतमं मानुष्यं सद्गुरुसमागमंच बहु



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पुण्येन समवाप्य पंचप्रकारमपि प्रमादं परित्यज्य सर्वज्ञभाषितधर्मकर्तव्यं कुरुत धर्मेणविनाकस्याऽपि दुःखमुक्तिः सुखसंपत्तिश्च न संजाता. स धर्मो दानशीलतपोभावभेदाच्चतुर्विधः प्रोक्तस्तत्र मुमुक्षुभावं विनाऽविधिनाकृतानि दानशीलतपांस्यपि मोक्षदानि न भवन्ति किन्तु संसारवर्द्धकानि भवन्ति तस्माद्भावविशुद्ध्यै यतनीयं। भावविशुध्धिश्चमनोविजयं विना न स्याद् मनश्चाऽऽलंबनं विना जेतुं न शक्यमतो ज्ञानिभिस्तस्य विजयार्थं सालंबनंध्यानं प्रोक्तं। शास्त्रेषुयद्यपि बहुविधान्यालंबनानि सन्ति तथापि श्रीतीर्थनायकैः सिध्धचक्रालंबनं सुश्रेष्ठं गदितं तत्सिध्धचक्रमर्हत्सिध्धाचार्योपाध्यायसाधुदर्शनज्ञानचारित्रतपःस्वरूपैर्नवभिः पदैःकृत्वाध्यायते समाराध्यते च। तत्रप्रथमपदे—केवलज्ञानदर्शनधरा विगतरागद्वेषाः प्रवर्तितधर्मतीर्थाः प्रणतसुरेन्द्राश्चतुस्त्रिं—शदतिशयालंकृता अर्हन्तो निरंतरं द्वादशगुणै र्ध्यातव्या द्वितीयपदे सकलकर्मविनिर्मुक्ताः पंचदशभेदसिद्धा ज्वलितसंसारकारणकर्मबीजाः सिद्धानन्तचतुष्टयाः सिद्धा नित्यमष्टगुणै र्ध्यातव्याः। तृतीयपदे पंचाचारपालक प्रवर्तकाः सर्वज्ञप्रणीतशास्त्रोपदेशरक्ताः सर्वज्ञशासनस्तंभभूताः स्मारणवारणचोदनप्रतिचोदनपरा आचार्याः सदा षट्त्रिंशद्गुणैर्ध्यातव्याः। चतुर्थपदे सूत्रार्थज्ञपाठकाः स्वाध्यायध्यानलीना गणकार्यनियुक्ता उपाध्याया



P.P. Ac. Gunratnasuri M.S.  Jun Gun Aaradhak Trust

नित्यं पंचविंशतिगुणैर्ध्यातव्याः। पंचमपदे जितेन्द्रियाः प्रतनुकषायाः समितिगुप्तिधरा गुर्वाज्ञा-पालनपरा ज्ञानदर्शनचारित्रयुताः साधवो निरंतरं सप्तविंशतिगुणैर्ध्यातव्याः। षष्टपदे जिनोक्ततत्त्वसद्दहणात्मकं, शंका-कांक्षाविचिकित्सामिथ्यादर्शनिगुणवर्णनमिथ्यात्विसंसर्गात्मकदोषविमुक्तं, धर्मवृक्षबीजभूतं सम्यक्त्वरत्नं चित्त-निधौ संस्थाप्य सप्तषष्टिभेदगुणैः सदाध्यातव्यं। सप्तमपदे सर्वगुणमूलं पेयापेयभक्ष्याभक्ष्यकृत्याकृत्यविवेकप्रदं लोकालोकप्रकाशकं सर्वज्ञप्रणीतनवतत्त्वावबोधस्वरूपं ज्ञानं विनयेन शिक्षित्वा स्वाध्यायमग्नेन नित्यमेकपंचाश-भेदगुणैर्ध्यातव्यं। अष्टमपदे कषायेन्द्रियजयाऽविरतिदंडविरतिस्वरूपं देशसर्वविरत्यादिसत्क्रियाप्रवृत्तिलक्षणमति-चारदोषविमुक्तं सर्वज्ञदर्शितमुत्तमं चारित्रं यथाशक्ति पालनपूर्वकं सप्तदशभेदैः सप्ततिभेदगुणैर्वा सदा ध्यातव्यं। नवमपदे कर्मवृक्षमूलोन्मूलनक्षममनेकलब्धिलक्ष्मीवल्लीमूलं द्वादशप्रकारं जिनप्रणीतं तपो गतसंसारस्पृहेण यथा-शक्तिकरणपूर्वकं द्वादशभेदैः पंचाशद्भेदगुणैर्वा नित्यं ध्यातव्यं। सर्वज्ञधर्मसारभूतानि सकलदुःखनाशपूर्वं सर्व सुखसिद्धिप्रदान्येतानि नवपदानि सदासद्ध्यानपूर्वकं सर्वज्ञोक्तविधिनासमाराधनीयानि च। एतैःसिद्धं श्रीसिद्ध चक्रं समाराधयञ्जीवः श्रीपालवत्सदा सुखीभवति। तन्निशम्य मगधाधिपेन पृष्टं भगवन् क एष श्रीपालः ?

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कथं तेन सिद्धचक्रं समाराधितं कथं च सुखं प्राप्तं तत्कृपां विधाय कथयत तदा श्रीगौतमस्वामिना भणितं विविधाऽश्चर्ययुतं सिद्धचक्रमाहात्म्यप्रदर्शकमेतच्चरितमहं कथयामि त्वं सावधानीभूय श्रुणु लक्षयोजनप्रमाणे वृत्ताकारेऽस्मिञ्जम्बूद्वीपे प्रवरपुरग्रामनगराऽऽकरप्रोतुंगपर्वतनदीसरःगोकुलवनोद्यानादिव्याप्तः सुसमृद्धो मालवनामा देशोऽस्ति तत्र तद्देशाभूषणभूता प्रभूतप्रोत्तुंगजिनप्रासादमंडिता बहुसज्जनकोटीश्वरविद्वज्जनकृतवासा रूपलावण्याधरीकृतसुरसुंदरीभिःसुंदरीभिश्पूर्णा प्रवरहट्टश्रेणिभिः शोभितमध्यभागा बहुजानपदनिवासगमनागमनकारणा प्रोत्तुंगप्राकारखातिका प्रतोलीवापीकूपसरोवनोद्यानादिपरिवेष्टिता प्रसिद्धोज्जयनी नाम नगरी समस्ति। तस्यां नगर्यां महाप्रतापवान् शत्रुहस्तिपंचाननो धैर्यौदार्यादिप्रभूतगुणपूर्णो दुर्जनसज्जनेषु भीमकान्तगुणः प्रजापालाभिधोभूपालो बभूव. परिणीतप्रभूतधराधीशकन्यकस्य तस्य नृपालस्यात्यंतवल्लभे द्वे पटराज्ञ्यावास्तामेका मिथ्यादर्शनभावितचित्ता रूपनिर्जितरंभा सौभाग्यसुंदरी. द्वितीया जिनधर्मभावितचित्ता स्वरूपाधरीकृतकामपत्नी रूपसुंदरी. तेद्वेऽपि तुल्यवयःसौभाग्यरुपनिपुणत्वयुते शीलालंकृते परस्परं सापत्न्ये सत्यपि प्रीतिकलितेऽभूतां नवरं स्वधर्मस्थिरचित्तयोस्तयोः कस्मिन्कस्मिन्काले परस्परं महान्धर्मवादः संजायते. एवं सुखेन



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कालं गमयन्त्यौ ते द्वेऽपि सगर्भे संजाते. नृपपूरितदोहदे ते द्वेऽपिपूर्णे गर्भकाले सुते प्रसूतवत्यौ नरपतिना वर्द्धापनिका विहिता ततो ज्ञातिस्वजनसत्कारपूर्वकं सौभाग्यसुंदर्यात्मजायाः "सुरसुंदरी" रूपसुंदरीतनुजाया "मदनसुंदरी" चेत्यभधाने स्थापिते। बालक्रीडां कुर्वत्यौ ते द्वेऽपि कन्ये द्वितीयाशशांकवद् वृद्धिं यातः स्म। क्रमेण विद्यापठनयग्यं वयःप्राप्ते कुमार्यौ ज्ञात्वा नृपेण विचारितं विद्याहीनं जीवितं पशुतुल्यं व्यर्थं च। यदुक्तं-विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं। विद्या भोगकरी यशः सुखकरी विद्या गुरुणां गुरुः॥ विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं। विद्या राजसु पूज्यते न तु धनं विद्याविहीनःपशुः ॥१॥ रूपयौवनसंपन्ना, विशालकुलसंभवाः। विद्याहीना न शोभन्ते, निर्गंधा इव किंशुकाः॥२॥ न हीनो धनहीनोऽपि, धनं वा कस्य सुस्थिरम्। विद्याहीनस्तु यः कोऽपि, स हीनः सर्ववस्तुषु ॥३॥ न चोरचौर्यंन च राजहार्यं, न भ्रातृभाज्यंन च भारकारि। व्यये कृते वर्द्धत एव नित्यं, विद्याधनं सर्वधनप्रधानं ॥४॥ यद्यपि भवति विरूपो, वस्त्रालंकारवेषपरिहीणः। सज्जनसभां प्रविष्टः, शोभामुद्वहति सद्विद्यः ॥५॥ शुनः पुच्छमिव व्यर्थं, विना ज्ञानं हि जीवितं। न गुह्यरक्षणे दक्षं, न दंशमशकापहं ॥६॥ अतो बाले पाठ्यामि ततस्तयोर्जनन्योरिच्छानुसारेणाऽध्यापनार्थं



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सुरसुंदरी शिवदर्शनपालनदक्षाय शिवभूतये विदुषे समर्पिता मदनासुंदरी च श्रीजिनधर्मानुरागिणे तत्त्वज्ञाय सुबुद्धिविदुषे समर्पिता. तत आलस्यं विलासितां च त्यक्त्वा सोत्साहं तन्मयत्वेनाऽध्ययनंकुर्वतीभ्यां ताभ्यां-विनीताभ्यां बुद्धिमतीभ्यां स्तोककालेनैव व्याकरणकाव्यछंदालंकारतर्कभाषागणितज्योतिर्वैद्यकगीतनृत्य-वाद्यश्रृंगारभरतचित्रविद्यामन्त्रयंत्रतंत्रलक्षणादिसकलकलाशास्त्राण्यधितानि. तेषु निपुणत्वं च प्राप्तं. यत आलस्यविलासितादिना कलावबोधो न भवति यदुक्तम्—आलस्येन हता विद्या, आलापेन कुलस्त्रियः। अल्प-बीजं हतं क्षेत्रं, हतं सैन्यमनायकं॥१॥ अलसो मंदबुद्धिश्च, सुखितो व्याधितस्तथा। निद्रालुःकामुकश्चेति, षडे-ते शास्त्रवर्जिताः ॥२॥ पठ पुत्र किमालस्य—मपठो भारवाहकः। पंडितः पूज्यते लोके, पठ पुत्र दिने दिने ॥३॥ सुखार्थी त्यजते विद्यां, विद्यार्थी त्यजते सुखं। सुखार्थिनः कुतो विद्या, विद्यार्थिनः कुतःसुखं ॥४॥ पठ-नसिद्धिवृद्धिकृत आन्तरबाह्यभेदादेतानि दश साधनानि प्रोक्तानि-तद्यथा आरोग्यबुद्धिविनयोद्यमशास्त्ररागाः, पंचाऽऽन्तराःपठनसिद्धिकरा भवन्ति। आचार्यपुस्तकनिवाससहायभिक्षा, बाह्याश्च पंच पठनं परिवर्द्धयन्ति॥५॥ यदिस्तोका बुद्धिः स्यात् तथाऽप्युद्यमो न त्याज्यो युदुक्तं-जइविहु दिवसेण पयं, धरेइ परकेण वा सिलोगद्धं।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

उज्जोअं मा मुंचसु, जइ इच्छसि सिरिकउं नाणं ॥६॥ गतेऽपि वयसि ग्राह्या, विद्या सर्वात्मना भृशं। यदीह फलदा न स्याद्,सुलभाऽपरजन्मनि॥७॥ संतोषोऽपि विद्यायां न कर्तव्यो-यदुक्तं-संतोषस्त्रिषु कर्तव्यो,स्वदारे भोजने धने। त्रिषु चैव न कर्तव्यो,दाने चाऽध्ययने तपे ॥८॥ श्लोकार्द्धं श्लोकपादं वा, समस्तं श्लोकमेव वा। अवंध्यं दिवसं कुर्याद्दानाध्ययनकर्मसु॥९॥ एवं सकलकलाकलापपंडितत्वे प्राप्तेऽपि यदि एका धर्मकला नाऽभ्यस्ता तर्ह्यपंडितत्वमेव कथितं—यदुक्तं—बावत्तरि कलाकुसला, पंडियपुरिसा अपंडिया चेव। सव्वकलाणं पवरं, जे धम्मकलं न याणंति ॥१०॥ यतो धर्मकलाज्ञानं विना परमार्थतः स्वहितं न संसाध्यते, केन कर्तव्येन वा स्वहितं संजायते तदपि न ज्ञायते परमार्थतः स्वस्य देहाभिन्नत्वमपि न ज्ञायते शिक्षिताश्च कला अपि कस्मिन् कस्मिन्कार्ये कया कया रीत्या व्यापारिताः परमार्थतो गुणं वा दोषं वा कुर्वन्ति तदपि सम्यग् न ज्ञायतेऽतो धर्मशास्त्रज्ञानं परमोपादेयभूतमनिवार्यस्वहितपरमसाधनमस्ति तच्च धर्मशास्त्रं गतरागद्वेषसर्वज्ञप्रणीतमेव ज्ञेयं. न तु सरागरोषाऽसर्वज्ञप्रणीतं तस्यत्वसत्यत्वहेतुरागद्वेषाऽसर्वज्ञतादोषोपहतत्वाच्च शास्त्राभासत्वं मिथ्याशास्त्रत्वं च प्रसिद्धमेव- अथाधीतसकलान्यकलाभ्यां कुमारीभ्यां स्वीयस्वीयाऽध्यापकपार्श्वाद् धर्मशास्त्राध्ययनमपिकृतं परं तयोर्मध्ये

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सुरसुंदरी सरागद्वेषाऽसर्वज्ञप्रणीतमिथ्याधर्मरक्ताऽध्यापकसंयोगाद् धर्माभासे मिथ्याधर्मे निपुणा जाताऽत एव च पुद्गलानन्दिनी दुरन्तसंसारसुखाभिलाषिणी च संजाता। मदनसुन्दरी च गतरागद्वेषसर्वज्ञप्रणीतसम्यग्धर्मरक्ताऽध्यापकसंयोगात्सम्यग्धर्मे निपुणा जाताऽत एव च नवतत्त्वकर्ममूलोत्तरप्रकृतिसत्ताबंधोदयोदीरणादिसूक्ष्मविचारातिप्रवीणा ज्ञातहेयज्ञेयोपादेयाऽऽत्मानन्दिनी सुदेवगुरुधर्माराधनपरा संजाता। प्रायेण यादृशो गुरुस्तादृशी मतिराचरणा च विनीतशिष्यस्य संजायते।

अथैकदाऽभ्यन्तरसंसद्युपविष्टेन प्रजापालभूपालेन साध्यापके स्वकन्यके समाकारिते ततःस्वरूपलावण्याकर्षितसभे ते कन्ये समागते भूपालेन च स्नेहपूर्वकं स्वोभयपार्श्वयोरुपवेशिते। ततः सहर्षेण पृथ्वीपेन तयोः स्वपुत्र्योः प्रज्ञापरीक्षणार्थमेवं समस्यापदं पृष्टं-"चैतत्पुन्येन लभ्यते" तदा चंचलहृदया स्वविद्यानैपुण्यगर्विष्ठा हुं ज्ञातं मयैतदहं पूरयामीति वदन्ती सुरसुन्दरी स्वकीयं पुद्गलानंदित्वं प्रकटं कुर्वतीव प्रोवाच-आरोग्यरूपनैपुण्यं, स्वेष्टान्नाभूषणांशुकं। नृत्यगानेष्टसंयोगं, चैतत्पुन्येन लभ्यते॥१॥ एतत् निशम्य तत्त्वमजानाना पुद्गलानंदिनी सभूपा सभा हर्षिता सती सुरसुन्दर्याः प्रशंसां चकार। ततो नृपेण पृष्टा तत्त्वज्ञा मदनसुन्दरी स्वकीय-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मात्मानन्दित्वं प्रकटं कुर्वतीव प्रोवाच—विवेकविनयाऽर्हत्सद्-गुरुधर्मसुसेवनं। तत्त्वज्ञत्वं मुमुक्षुत्वं, चैतत्पुन्येन लभ्यते ॥२॥ तन्निशम्य कैश्चित्तत्त्वज्ञैः सह तस्या जनन्युपाध्यायौ सानन्दौ जातौ परमतत्त्वज्ञा सर्वरापाला-सभा नाऽऽनन्दिता। यतो मिथ्यादृष्टिभ्यो तत्त्वं न रोचते। यदुक्तं—यथोयुतं शर्करया कटूयते, यथैव पित्तज्वर-भाविते जने। तथैव तत्त्वं विपरीतमंगिनः प्रतीपमिथ्यात्वदृशो विभावते ॥१॥ यथान्धकारान्धपटावृतोजनो, विचित्रचित्रं न विलोकितुंक्षमः। यथोक्ततत्त्वं जिननाथभाषितं, निसर्गमिथ्यात्वतिरस्कृतस्तथा ॥२॥ इतश्च तदा-कुरुजंगलजनपदालंकारनिभायाः पश्चादहिछत्रानाम्ना प्रसिद्धायाः शंखपुर्याह्वपुर्याः स्वामी दमितारिर्दमिता-रिनामा पृथ्वीपतिः प्रजापालभूपस्य सेवक आसीत्। स प्रतिसंवत्सरं प्रजापालनरेन्द्रस्य सेवार्थं समायाति। तस्य तारुण्यंप्राप्तो रूपवानरिदमननामा कुमारोऽन्यदा स्वजनकस्थाने प्रजापालनृपस्य सेवार्थमुज्जयिनीं समागतः, स कुमारस्तस्मिन्काले प्रजापालनरेन्द्रनमनार्थं तत्र समायातः, पृथ्वीपं प्रणम्योचितस्थाने समुपविष्ट-स्तं सुरूपवन्तं कुमारं वीक्ष्य मोहिता सुरसुन्दरी कटाक्षबाणान्मुंचती तस्मिन्स्वदृष्टिं स्थिरां चकार, भूपतिना तत्सर्वं दृष्ट्वा स्नेहेन प्रोक्तं हे सुपुत्रि तुभ्यं कीदृशो भर्ता रोचते तत्कथय? तदाऽत्यर्थंहर्षिता कामग्रथिला

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्यक्तलोकलज्जा सुरसुंदरी प्रोवाच महाप्रसादस्तात यत्प्रार्थितं दीयते, ततोऽरिदमनकुमारंप्रति स्वांगुलीनिर्देशं कृत्वाऽकथयत् सकलकलानिपुणो दिव्यरुपलावण्यधर ईदृशः स्वामी मह्यं रोचतेऽथवाऽत्र कार्ये तात एव प्रमाणं। पुनर्हे तात त्वमेव प्रत्यक्षं सेवकजनमनोवांछितपूरणकल्पपादपतुल्योऽसि त्वयि तुष्टे सर्वाः प्रजाः सुखिन्यः स्युस्त्वयि रुष्टे च दुःखिन्यः स्युरतस्त्वमेवाऽस्माकं पालकः पोषकः सुखदुःखयोश्च दायकोऽसि। तन्निशम्याऽत्यर्थं तुष्टो पृथ्वीपालस्तस्या वांछितं पूरणार्थं समासमक्षमरिदमनकुमारेण सह तस्याः संबन्धं चकार. तदा पार्षद्यः प्रोक्तं हे नरेन्द्र पूगपादपनागवल्लीवाऽयं संबन्धः शोभनः संजातः। अथ क्ष्मापेण सस्नेहं मदनसुंदरीति पृष्टा वत्से कथय तुभ्यं कीदृशोवरो रोचते तच्छ्रुत्वाऽपि ज्ञातकर्मस्वरुपा तत्त्वज्ञा विवेकवती सलज्जा मदनसुन्दरी मौनेनाऽधोमुखी तस्थौ. ततः पुनः पुनः प्रजापतिना पृष्टा सा किंचिद्विहस्य प्रोवाच हे तात त्वं विवेकवानसि तत इदमयुक्तं प्रश्नं किं करोषि? कुलबालिकानां किमेव आचारोऽस्ति यद् भवतां पुरः कथयेद् मह्यममुको स्वामी रोचते. ततः पितृभ्यांकन्याया येन सह संबन्धः कृतः स एव स्वीकार्योऽस्मिन् विषये जननी जनकौ तु निमित्तमात्रं स्यातां. संबन्धस्तु पूर्वकर्मकृत एव संजायते. सर्वेऽपि जीवाः स्वकृतकर्मणैव सुखदुःखानि

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्राप्नुवन्ति. अन्यस्तुनिमित्तमात्रमेवस्यात् । दुःखभीतः प्राणी सुखार्थमन्यत्र पलायमानोऽपिस्वकृतकर्मणा न मुच्यते. येन यत्रेस्थाने यस्मिन्काले यादृशं कर्मफलं प्राप्यं तस्य तत्र तदा तादृग् भवत्येव। यदुक्तं-यत्र वा तत्र-वायातु, यद्वातद्वाकरोत्वसौ । तथापिमुच्यतेप्राणी, न पूर्वकृतकर्मणः ॥१॥ याति दूरम सौ जीवो-ऽपायस्थाना दुष्कृतः । तत्रैवानीयतेभूयो, रज्ज्वेवप्रौढकर्मणा ॥२॥ विभवोनिर्धनत्वं च, बन्धनं मरणं तथा । येनयत्रयदा-लभ्यं, तस्य तत्र तदाभवेत् ॥३॥ प्रभूतपुन्या कुमारी हीनकुले यदि दीयते तथापि सा स्वपुन्येन सुखिनी-भवति, पुन्यहीना कुमारी यदि समृद्धकुले दीयते तथापि दुःखिनी भवत्यतो केनाऽप्यहं सुखदुःखानां दाते-ति गर्वो न विधातव्यो यतोऽन्यः कोऽपि दातुं न समर्थोऽन्यः सुखदुःखानां दातेति बुद्धिरपि कुबुद्धिरेव. यदुक्तं-सुखस्य दुःखस्य न कोऽपि दाता, परो ददातीतिकुबुद्धिरेषा। पूराकृतं कर्म तदेव भुज्यते, शरीरहेतोस्त्व स्याऽऽत्मनाकृतं ॥४॥ एतन्निशम्य कुपितो भूपालोऽवोचत् त्वं मत्कृतंकिमपि न मन्यसे? कस्यप्रसादेन त्वं राज्ययोग्यस्वेष्टान्नांशुकालंकारादीनां भोगंकरोषि दासदासीभिश्चसेव्यसे? तच्छ्रुत्वा कुमारी प्रोवाच हे तात पूर्वकृतशुभकर्मणैव त्वदीयवेश्मनि समुत्पन्नाऽस्मि सुखानि च भुनज्मि नाऽत्र युष्माकंकर्तृत्वमस्ति कुर्द्वैरपि



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भवद्भिर्मदीयं प्राक्कृतं कर्माऽन्यथाकर्तुं न शक्यते । यदुक्तम्–यदुपात्तमन्यजन्मनि, शुभमशुभं वा स्वकर्म परिणत्या । तच्छक्यमन्यथा नैव, कर्तुं देवासुरैरपि ॥५॥ आरोहतु गिरिशिखरं, समुद्रमुलंघ्य यातु पातालं । विधिलिखिताक्षरमालं, फलतिकपालं न भूपालः ॥६॥ यदि युस्मदीयप्रसादेन युस्मदाज्ञावर्तिनः सर्वेऽपि सुखिनः स्युस्तर्हि युस्मदाऽऽज्ञावर्तिनः सेवापरा अपि केचित्कथं दुःखिनो दृश्यन्ते. यदि च सुखदुःखदाने युस्माकं कर्तृत्वमस्ति तर्हि सुखेच्छून्युस्मानपि रोगेष्टवियोगानिष्टसंयोगादीनि दुःखानि किं न पीडयन्ति ? ततो येन जीवेन यादृशं शुभाऽशुभं कर्म समुपार्जितं तेन तादृशं भोक्तव्यमेवेति मम मनसि धैर्यं वर्तते संबन्धोऽपि कर्मस्थित एव भवति तस्माद् यो युष्मभ्यं रोचते स एव वरो मम प्रमाणं यद्यहं सपुन्या तर्हि मह्यं दत्तोनिर्गुणोऽपि वरः सुगुणो भविष्यति यदिचाऽहं निष्पुण्या तर्हि मदीयपुन्यहीनत्वेन सुगुणोऽपि निर्गुणो भविष्यति । तन्निशम्याऽत्यर्थं क्रुद्धो नरपतिरचिन्तयद् दुर्मतिपाठकेन दुष्टशिक्षां प्रापितयाऽनया कुकन्यया सभायामहं लघूकृतस्तत एषा मम वैरिणी निश्चितं मया दुःखे पातनीया । तदाऽऽकृत्या भूपं कुपितं वीक्ष्य सभाजना अपि प्रोचुः स्वामिन्नेषा बाला किं जानीयात्तुष्ठा युयं कल्पपादपतुल्याः क्रुद्धाश्च युयं



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यमसदृशा एव तच्छ्रुत्वामदनासुन्दरी प्रोवाच धिगस्तु धिगस्तु वित्तलवलुब्धान् हिताऽहितमविचार्य प्रियवादिनः सभाजनान्। एतादृशा खलु यत्र तत्र सुलभाः सन्ति यदुक्तं—सर्वत्र सुलभाः सन्ति, सततं प्रियवादिनः अप्रीयस्य तु पथ्यस्य, वक्ता श्रोता च दुर्लभः ॥१॥ अप्रियाण्यपि पथ्यानि, ये वदन्ति नृणामिह। त एव सुहृदः प्रोक्ता, अन्ये तु नाम धारकाः ॥२॥ अथ तदा भीषणाकृतिमत्यर्थं कुपितं किंचिद्वक्तुमिच्छन्तं पृथ्वीपं वीक्ष्य परिणामवैपरीत्यं च विचार्याऽवसरज्ञः सुबुद्धिनामा मन्त्री धरोऽप्रोचत्पृथ्वीप कुमार्या सह वाद-करणंभवादृशां न युक्तं पुनः संप्रत्युद्यानपालेन विज्ञप्तिः कृताऽस्ति यदधुना वसंतर्तौ वनं विकसितमस्त्यतो भवतां तत्रगमनं युक्तं तन्निशम्यरोषभृद्वसुधापतिस्तत उत्थायाऽश्वमारुह्य मंत्रिसामंतादिपरिवृतो यावन्नगरा-द्बहिर्निर्गतस्तावदग्रे सकोलाहलं संमुखं समागच्छन्तं जनवृन्दं दृष्ट्वा तद्वृत्तान्तं मंत्रिणमपृच्छत्। मन्त्री प्राह हे स्वामिन् सुरूपा शूरवीरा सप्तशतानि पुरुषाः समकालं दुष्टकुष्टरोगपीडिता एकत्र संभूय लब्धमेकमुंबर-रोगपीडितमुंबराख्यं बालं नृपं कृत्वा वरवेसरमुपवेश्य मंत्रिछत्रधरचामरधरवेत्र्यादीन् संस्थाप्य स्वयोग्यां राज्य-रीतिं च विधाय यथेच्छं नरपतीनां समीपं गत्वा याचनापूर्वकं स्वेष्टं गृह्णन्ति एतेसर्वेऽपि वेसरवाहना

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

व्रणपूतिक्लिन्नदेहाः कृमिमक्षिकासमूहव्याकुलाः गलितत्वचो प्रोच्छलद्दुर्गंधा महादुःखिनः प्रेतसदृग्विरूपाः प्रत्यक्षं नारका इव समायान्ति। एतेषां वायुस्पर्शनतोऽपि रोगोत्पत्ति र्भवति तस्मादन्यमार्गेण गमनं युक्तं तन्निशम्य धरापालोऽन्येन पथा गमनं चकार तत्स्वरूपं ज्ञात्वा गलितांगुल्यभिध उंबरराजमंत्री वेसरवाहन-स्त्वरितं भूपालसमीपं समागत्य प्रोवाच हेपृथ्वीपते वयं सर्वत्र यथेप्सितं धनधान्यवस्त्राभूषणादिकं दानं सन्मानसत्कारं च लभामहे तस्मात्तेषु वस्तुषु काऽपिन्युनता नास्ति परमस्मदीयहृदयस्थित एको मनोरथो भवद्भिः पूर्यतामस्माकमुंबरनामा राजाऽस्ति तस्य राज्ञी नास्ति ततः कृपां विधाय कामप्येकां कन्यां युयं प्रयच्छत तदामंत्री प्राह भो अयोग्यं प्रार्थितमेतत्किं कोऽपि स्वकुमारीं कुष्ठरोगिणे दद्यात्? तन्निशम्य पुनः कुष्ठिमन्त्री प्रावददस्माभिर्मालवेशप्रजापालभूपस्य कीर्तिरेवं समाकर्णिता यद् मालवेन्द्रो कस्याऽपि प्रार्थनाभंगं न विदधाति. यदि तादृग्निर्मलकीर्तेर्वाञ्छा तर्हि कांचिद्धीनकुले समुत्पन्नामपिकन्यां प्रयच्छत. तदाकीर्तिलोप-मनिच्छता मदनसुंदरीकर्मवादं च स्मरता रोषनष्टविवेकेन राज्ञा प्रोक्तं युष्माकं प्रार्थितंदास्येऽधुना स्वस्थानं व्रजत ततः कुष्ठिमन्त्री गतो नृपालश्च पश्चाद्वलित्वा पर्षदं च समागत्य मदनासुंदरीं समाकार्य प्रोवाच हे

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

पुत्रि त्वमधुनाऽप्येवं वद हे तात तवप्रसादेनैव सुखिन्यस्मि त्वमेव सुखदुःखयोर्दाताऽसि. त्वयेतिप्रोक्ते सति प्रसन्नीभूतोऽहं श्रेष्टवरप्रभूतवित्ताभरणादिकं दत्त्वा त्वां सुखिनीं करोमि यदि च कर्मकृतं मन्यसे तर्हि त्वदीय-कर्मसमानीतः कुष्टरोगपीडितो वरः समागतोऽस्ति स तव वरो भवतु. तच्छ्रुत्वा कर्मनिश्चलचित्ता तत्वज्ञा मदनासुंदरी प्रसन्नवदना प्राह हे तात यदि मदीयकर्मसमानीतस्तर्हि स कुकुलः सुकुलो वा निर्धनः सधनो वा वरो युष्माभिर्दत्तो मम प्रमाणं. तदा कोपारुणलोचनेन नष्टविवेकचक्षुषा धरापतिना कुष्टिभूपं समाहूय प्रोक्तं हे उंबर त्वमस्या मत्पुत्र्याः कर्मानीतो वरोऽस्यतो मया तुभ्यमियं दत्ता त्वमेनां वृणुस्व तदोम्बरोऽकथय त्पृथ्वीप त्वया स्वमुखेनैतद्वक्तुमपि न युक्तं। कः प्राज्ञो रत्नमालां वायसग्रीवायां प्रक्षिपेदन्यच्चाहं प्रागेव पूर्वदुष्कृतोदयात्कुष्टपीडितोऽस्मि तत्पुनःकथमे तादृशमकार्यं कृत्वैतादृशस्य स्त्रीरत्नस्य जन्म नाशयेयमनेन चाऽयोग्यकर्तव्येन तवाऽपि महत्यपकीर्तिर्भविष्यति त्वादृशानां कन्यया सहविवादकरणमयुक्तमतो हे भूप मादृशीं कामपि हीनकूलोद्भवां कन्यां देहि नोचेत्तुभ्यं स्वस्ति समस्तु तदा धरित्रीपतिरकथयत् भो उंबरैषामदीया पुत्री कृतस्वकर्मकदाग्रहा मत्कृतंसुखादिकं किमपि न मन्यते त्वं चाऽस्याःकर्मानीतो वरोऽसि ततो यदि सत्यप्रति-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ज्ञैषा तर्हि मया वरत्वेन दत्तं त्वां वरिष्यति तत्समाकर्ण्य सर्वज्ञमतभावितमति दृढसम्यक्त्वा धैर्यवती सा मदनसुन्दरी मन्त्रीसामन्तान्तःपुरपरिवारादिभिर्निवार्यमाणाऽपि प्रसन्नवदनकमला एष एव मम प्रमाणमितिवदन्ती विवाहमुहूर्तं साधयन्तीवोम्बरस्य हस्तं स्वहस्तेन गृहीतवती सभायां च हाहारवः समभूत् तस्या मातुलजननीपरिवारश्चाक्रन्दं चकार तथाप्यत्यर्थं कठिनहृदयो क्ष्मापः कोपं न तत्याज यतः कोपो विवेकप्रज्ञाप्रीतिकीर्त्यादिकं नाशयति–यदुक्तं–सन्निपातज्वरेणेव, क्रोधेन व्याकुलो नरः ॥ कृत्याकृत्यविवेके हा, विद्वानपि जडी भवेत् ॥१॥ क्षमी यत्कुरुते कार्यं, न तत् क्रोधवशंवदः ॥ कायस्यसाधनी प्रज्ञा, सा च क्रोधेन नश्यति ॥२॥ संतापं तनुते भिनत्ति विनयं सौहार्दमुत्सादय–त्युद्वेगं जनयत्यसत्यवचनं सूते विधत्ते कलिं। कीर्तिं कृन्तति दुर्मतिं वितरति व्याहन्ति पुण्योदयं, दत्ते यः कुगतिं स हातुमुचितो रोषः सदोषः सताम् ॥३॥ अथ प्रभूतधैर्यवती ज्ञाततत्त्वा विकसितवदना वेसरारूढा मदनसुन्दरी लोकैः क्रियमाणां निन्दां श्रुण्वंत्युम्बरराजेन सह चचाल यतः सत्यप्रिया धीरा निन्दास्तुतिवित्तादिकं न गणयन्ति यदुक्तं–निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु, लक्ष्मीः समाविशतु गच्छतु वा यथेष्टं ॥ अद्यैव वा मरणमस्तु युगान्तरे वा, न्यायात्पथः



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

प्रविचलन्ति पदं न धीराः ॥१॥ तदा लोकाः प्रजजल्पुरहोऽयुक्तं संजातं केचिद्वदन्ति पृथ्वीपं धिगस्तु येन बालिकया सह वादं विधाय कोपं गतेनाऽयुक्तं कृतं. केचिच्च प्रोचुः कन्यां धिगस्तु यया दुर्विनीतया दुराग्रहवत्या धरित्रीपः कोपितः, एवं केचिदध्यापकं केचिज्जननीं, केचिद्विधिं केचिच्च जैनधर्मं निन्दन्तो धिक्कारयांचक्रुः। यतःपरमार्थ मजानानो लोको यथा तथा जल्पति तस्य मुखाच्छादनं कर्तुं न शक्यतेऽतःस्वहिताचरणे प्रयतितव्यं-यदुक्तं-व्यलीकमस्तु मा वास्तु, लोकोक्तिस्तु सुदुःसहा। भाजनं भज्यतां मा वा, रणत्कारो भयंकरः॥१॥ सर्वथा स्वहितमाचरणीयं, किंकरिष्यति जनो बहुजल्पः। विद्यते स नहि कश्चिदुपायः, सर्वलोकपरितोषकरो यः ॥२॥ लोककृतस्वनिन्दां श्रुत्वाऽपि जिनोक्ततत्त्वाचलश्रद्धावत्यनुत्सूत्रकथनपापा निष्पापा प्रसन्नवदना सा मदनसुन्दरी स्वीकृतपतिना सह कुष्टिस्थानं प्राप्ता। अयुक्तं संजातमिति ज्ञात्वेव भास्करोऽस्तं ययौ। अथ वांच्छाधिकप्राप्तितोऽत्यर्थमानन्दं प्राप्तैः कुष्टिभिस्तयोर्यथाशक्ति महामहेन विवाहःकृतः।

इतश्च प्रजापालनृपेण लोकापवादं श्रुत्वा तन्नाशार्थं लोकेभ्यः ससत्कारं मिष्टान्नदानं परमसाधनमिति विचार्य सुरसुन्दरी विवाहकरणं च संस्मृत्य नैमित्तिकं समाहूय विवाहलग्नं पृष्टं तदा नैमित्तिकः प्राह हे



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पृथ्वीपाऽद्य दिनशुद्धिस्तु समस्ति परं श्रेष्ठं लग्नं तु यदा मदनसुन्दर्योम्बरहस्तः स्वहस्तेन गृहीतस्तदाऽगात् तदा भूपःप्रोवाच मया तस्याः श्रेष्ठं लग्नं ज्ञातं येन तस्याः कुष्ठीपतिः संजातोऽहमधुना मदीयप्रियपुत्र्या महा-महेन विवाहं कृत्वा तां सुखिनीं करिष्यामि ततो नैमित्तिकं विसर्ज्य महामहपूर्वकं सुरसुन्दर्या अरिदमन-कुमारेण सह विवाहं चकार सुरसुन्दर्यै महामूल्यानि वस्त्राभूषणमणिरत्नमुक्ताफलादीनि प्रवरगजाश्वरथपदाति-दासदासीपरिवारहितशिक्षां च दत्त्वाऽरिदमनकुमारेण सह विससर्ज। तदा विवाहे प्राप्तसत्कारमिष्टान्नतृप्ता लोका नृपं सुरसुन्दरीं तज्जनन्युपाध्यायौ शिवधर्मं च प्रशशंसुः इतश्चाऽयुक्तकर्तव्येन विमनष्कः सत्स्वभावः उम्बरो रात्रौ मदनसुन्दरीं प्राह हे सुलोचने क्रुद्धेन वसुधापेनैतदयुक्तं कृतं तथाप्यधुना यावत्किमपि विनष्टं नाऽस्ति त्वमन्यं कमपि सुरूपवन्तं पुरुषोत्तमं स्वीकुरु येन तव रूपयौवनं निष्फलं न भवेदहमपि च त्वदीय-जीवननाशनपापप्रमुक्तो भवेयमत्र स्थितायास्तव रोगोत्पत्त्यारूपयौवनारोग्यशरीरनाशप्रसंगो भविष्यति ममाऽपि कुसंगात्कुष्टोत्पत्तिः संजाता। तन्निशम्य संजातदुःखातिरेका प्रक्षरदश्रुका सतीमतल्लिका मदना-सुंदरी स्वनाथं प्रणम्य प्राह हे स्वामिंस्तव सकलादेशकर्यैवाहमस्मि परमेतादृशं स्वामिसंबन्धनाशकरंवचनं



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पुन र्न वक्तव्यमीदृशेन वचनेन मदीयहृदये महद्दुःखं समुत्पद्यते स्वपतिं त्यक्त्वाऽन्यत्र गमनं तत्सतीकार्यं नास्ति यदुक्तं—पंगुं मूकं च कुब्जं च, कुष्टांगं व्याधिपीडितं। आपत्सु च गतं नाथं, न त्यजेत्सा सती मता ॥१॥ प्रथमं तु स्त्री जन्माऽपि तुच्छं तदपि यदि शीलविहीनं तर्हि तु प्रागेव तुच्छस्य पश्चाच्च शटितस्याऽन्नस्येव तस्य किंवर्णनं क्रियतेऽतः परमालंकारभूतं शीलं नाहं त्यजेयं यतः शीलंपरमाभूषणमेवास्ति. यदुक्तं—ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो, ज्ञानस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रे व्ययः। अक्रोधस्तपसः क्षमा प्रभवितु र्धर्मस्य निर्व्याजता, सर्वेषामपि सर्वकारणमिदं शीलं परंभूषणम् ॥२॥ अतो हे स्वामिन्नामरणं त्वमेव मम शरणं त्वदीयशरणस्थितायाश्च धर्मकार्यरताया मम जीवितस्याऽपि साफल्यमेवाऽस्ति। इत्यादिवचनैः स्यकीयं नैश्चल्यं ज्ञापयन्त्यास्तस्याः सत्या दर्शनार्थमिव सूर्योऽप्युदयगिरिशिखरं समाययौ। ततोऽतिनिश्चलचित्तायास्तस्या वचनेनोम्बरस्तया सह श्री ऋषभप्रभो दर्शनाथ गतस्तत्र जिनवरं दृष्ट्वा द्वावपि सानन्दौ परया भक्त्या प्रणेमतुस्ततः सर्वज्ञशासनकुशला मदनसुन्दर्य्येवं स्तुतिं चकार—जय त्वं त्रिजगत्स्वामिन्, सर्वज्ञ सर्वदर्शन। तीर्थकृद्भगवन्नर्हन्, सुरेन्द्रार्चितपत्कज ॥१॥ सिद्ध सिद्धिद संसार—समुद्रात्तीर्ण



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तारक। कर्मरिपुवष्टकाद् मुक्त, मोचक नाथ ते नमः ॥२॥ वीतराग गतद्वेष, कामक्रोधादिनाशक। भक्त वांच्छितकल्पद्रो, देवदेव नमोऽस्तु ते ॥३॥ अद्याऽऽवयोर्गतंदुःखं, फलिताश्च मनोरथाः। आधिर्व्याधिर्गता जन्म, फलितं तव दर्शनात् ॥४॥ एवं स्तुतिलीनायां मदनसुन्दर्यां प्रसन्नशासनदेवताप्रेरितं श्रीजिनेन्द्रस्य हस्तस्थितं फलं कंठस्थितमालया सह भाविनीं कुशलतां सूचयदिव तयोःसन्मुखं समुच्छलितं तदा प्रिय-तमाकथनत ऊंबरेण फलं गृहीतं मदनसुन्दर्या च मालां गृहीत्वा कथितं हे स्वामिन्ननेन शुभसूचकशकुने नाऽद्यप्रभृति युष्मद्रोगोपशान्तिरावयोश्चसुखसमृद्धिः श्रीजिनदेवभक्तिप्रभावाद्भविष्यति ततोऽतिभक्तिमानसौ तौ विधिना चैत्यवन्दनादिना प्रभुभक्तिं विधाय जिनमन्दिरान्निर्गत्याऽऽसन्नोपाश्रयस्थितं श्रीमुनिचन्द्र-मुनीश्वरं भक्त्या वन्दित्वा धर्मोपदेशं श्रोतुमुपविष्टौ परोपकारपरेण गुरुणा धर्मोपदेशः प्रारब्धः—मानुष्य-मार्यक्षेत्रं च, कुलं जैनं सुदुर्लभम्। सद्गुरुंश्रवणंप्राप्य, दुर्लभं धर्ममाचरेत् ॥१॥ दुःखनाशकरो धर्मो, धर्मः सकलसौख्यदः। जैनःसेव्यो विनाऽऽलस्य—मपश्चात्तापवांच्छकैः ॥२॥ इत्यादिदेशनान्ते धर्मशास्त्रपृच्छा-द्यर्थंमाक् परिवारेण सह समागच्छन्तीं परिचितां नरेन्द्रपुत्रीं मदनसुन्दरीं समुपलक्ष्य गुरुरपृच्छद् वत्से कथम-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

परिवारा दृश्यसे ? कश्चासौ सल्लक्षणधरः पुरुषोत्तमस्त्वया सह समागतस्तदा मदनसुन्दरी सदुःखं स्वकीयं सकलंवृत्तान्तं गुरोरग्रे कथयित्वा पुनरवदत् हे स्वामिन् राज्यसुखनाशसरोगपतिप्राप्तिस्वजनपरिवारत्याग-मदीयनिन्दादिकं किमपि मदीयं हृदयं न पीडयति परं मिथ्यादृष्टिलोकैर्यज्जिनधर्मनिन्दनं मिथ्यादर्शन-प्रशंसनं च क्रियते तदेव मदीयहृदयमत्यर्थं पीडयति। ततो हे भगवन् तथाविधं कमप्युपायं कथयत येन मत्पतिरोगोपशान्त्या सह जिनशासनप्रशंसाभवेत्तदा गुरुणा प्रोक्तं सावद्यौषधविद्यामंत्रतंत्रादिकथनं साधू-नामकल्प्यं। यतः शास्त्रविरुद्धाऽकल्प्योपायेन कारिता जिनधर्मप्रशंसाऽयुक्ता परिणामाऽसुंदरा च भवति। परमेको निरवद्यः समग्रसुखनिदानं पूर्वकर्मप्रणाशको जिनशासनसारः सर्वज्ञोक्तो नवपदाराधनात्मकः सकलोपायोत्तमो वांच्छितपूरक उपायोऽस्त्यतस्त्वं स्वपतिना सह श्रीनवपदाराधनरूपोपायं कुर्वनेनोपायेन तव कान्तस्य दुष्टकुष्टोपशमनं भविष्यति। अर्हत्सिद्धाचार्योपाध्यायसाधुदर्शनज्ञानचरित्रतपोऽभिधैरेतै र्नवपदै र्विद्याप्रवादपूर्वात्पूर्वसूर्युद्धृतं श्रीसिद्धचक्रयंत्रं भवति। अद्ययावद् ये केचित्सिद्धिं गता गच्छन्ति गमिष्यन्ति च ते सर्वे सिद्धचक्रानुभावादेव। श्री सिद्धचक्रस्थितस्यैकतरस्यापिपदस्य समाराधनानुभावादनेके तीर्थंकर-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्वं समनुभूय मुक्तिं गतास्तर्हि नवपदाराधनानुभावस्य किं कथ्यते। श्रीसिद्धचक्रस्नात्रजलेन पुर्वोत्पन्नदुष्ट-कुष्टादिसकलरोगदोषोपशान्ति र्जायतेऽस्य समाराधनेन च पश्चादपि रोगदोषा न समुत्पद्यन्ते सकलसिद्धय-श्च सिद्धयन्ति, दौर्भाग्यविकलांगत्व-दासत्व-कुकुलत्व-वंध्यात्व-विषकन्यात्वादीन्यपि न प्रभवन्ति समग्रदेवनर समृद्धयोऽपि समीपं समायान्ति मुक्तिसुखमपि हस्तगतमेव भवति किंबहुना सकलाः मनोरथाः सिद्धिं यान्ति। श्री सिद्धचक्रस्याराधनमाश्विनधवलाष्टमीदिनादाराभ्य [अधुनासप्तमी वासरात्प्रवृत्ति दृश्यते] नव वासराणि यावदाचाम्लतपसा कर्तव्यं नित्यं सप्तदशभेदैरष्टभेदः र्वाजिनवरस्य स्नात्रपूजाविलेपनांगरचनादिका भक्तिः कार्या श्री गुरूणामपि परया भक्त्या विनयवैयावृत्यादिकं कर्तव्यं नवमे दिवसे विशेषतो विस्तरेण देवगुरुभक्तिः कार्या प्रतिदिनं प्रत्येकपदगुणानुसारेण स्वस्तिकक्षमाश्रमणचतुर्विंशतिस्तवकायोत्सर्गाः कर्तव्याः प्रत्येकपदस्य ॐ ह्रीँ युक्तो द्विसहस्रमितो जपः कर्तव्यस्त्रिर्देववन्दनं कर्तव्यं द्विश्चप्रतिक्रमणं कार्यं निर्मलंशीलं पालनीयंसंस्तारके शयनीयं श्रीगुरुमुखाच् श्री सिद्धचक्रस्य माहात्म्यं श्रोतव्यमाचाम्लस्य च प्रत्याख्यानं कर्तव्यं चैत्रसिताष्टमीतोऽपि नव दिवसानि यावदेतेनैव विधिना श्रीसिद्धचक्रस्याराधनं कर्तव्यमेवं प्रतिसंवत्सरं द्विः



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

 

कर्तव्यं। सार्द्धचतुःसंवत्सरान्त एकाशीतिसंख्याप्रमाणाचाम्लतपसैतत्सिद्धचकाराधनतपः संपूर्णं स्यात्पूर्णे तपसि यथाशक्त्युद्यापनं कर्तव्यं। अस्याराधकेन शान्तत्वदान्तत्वजितेन्द्रियत्वाऽकषायत्वाऽचलचित्तत्वाऽप्रमादित्वमुमुक्षुत्वादिनिर्मलगुणा धारणीया अन्यथा श्री सिद्धचक्राराधनस्य फलं न लभ्यते विपरीताचरणेन तु प्रत्युताऽपायो भवति। युवाभ्यां द्वाभ्यामपि कथितविधिना श्रीसिद्धचक्राराधनं कर्तव्यमिति गुरुणाप्रोक्ते सति मदनसुन्दर्युम्बराभ्यां तत्स्वीकृतं। ततः श्री गुरुणा तत्रोपविष्टश्रावकश्राविकासंघं प्रति प्रोक्तमेभिरुत्तमलक्षणैरयं पुरुषोत्तमः स्तोककालेनैव जैनशासनस्य महाप्रभावकपुरुषो भविष्यतीति ज्ञायतेऽतः श्री जिनवरैरुत्तमतया वर्णितं साधर्मिकवात्सल्यमनयोः साधर्मिकयोर्युष्माभिः कर्तुं योग्यं तन्निशम्य गुर्वाज्ञापालनं विना तपोध्यानत्यागादिकं सर्वं निष्फलं भवतीति जानद्भिः—यदुक्तं—किंध्यानेन भवत्वशेषविषयत्यागैस्तपोभिः कृतं, पूर्णंभावनयाऽलमिन्द्रियदमैः पर्याप्तमाप्तागमैः॥ किन्त्वेकंभवनाशनं कुरुगुरुप्रीत्यागुरोः शासनं, सर्वं येन विना विनाथबलवत्स्वार्थायनालं गुणाः ॥१॥ सुश्रावकैः स्तुर्णं तयोर्निवासार्थं धनधान्यवस्त्रादिभृतो महाप्रासादो दत्तः। यतो यथाश्रावकाः साधर्मिकाणां भक्तिं कुर्युस्तथाऽन्यः कः कुर्यात्—

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यदुक्तं-नय तं करेइ माया, नेवपिया नेव बंधुवग्गोय॥ जं वच्छलं साहम्मि-याण सुसावओ कुणइ॥१॥ अथ तत्र-स्थितौ तौ प्रतिदिनं जिनपूजागुरुभक्तिशास्त्रश्रवणतत्त्ववार्तादिकं सुकृतं चक्रतुर्मदनसुन्दरीप्रेरणया तत्पतिर्गुरु-पार्श्वात्सिद्धचक्राराधनाविधिमशिक्षत अथाऽऽश्विनमासशुक्लसप्तम्यां समागतायां सुमुहूर्ते ताभ्यां गुर्वाज्ञया गुरु-दर्शितविधिपूर्वकं श्रीसिद्धचक्राराधनमाचाम्लतपसा समारब्धं प्रत्यहं महाभक्त्या श्रीऋषभदेवस्य श्रीसिद्धचक्र-यन्त्रस्य च मनोवचःकायशुद्धिपूर्वकं पूजास्नात्रविलेपनादिकं कृत्वा स्वस्तिकादिसकलविधिःकृतः प्रथमदिने श्रीसिद्धचक्रस्नात्रजलसिंचनतः कुष्टरोगस्य मूलं ज्वलितं तेन शरीरान्तर्दाहोपशमनं संजातं द्वितीयदिवसे बहिरपि किंचिद्रोगोपशमनं संजातमेवंप्रतिदिवसं विशेषतो रोगशान्तिः संजाता नवमे दिवसे विशेषविस्तरेण पूजां विधाय पंचामृतेन च श्रीसिद्धचक्रस्य स्नात्रं कृत्वा विधिं समाप्य तेन स्नात्रवारिणा मदनसुन्दर्या स्वस्वामिनः समग्रं शरीरं संसिक्तं तत्स्नात्रजलप्रभावतोऽरोगं सुवर्णवर्णं दिव्यं शरीरं संजातं तदृष्ट्वा लोकमनसि महदाश्चर्यं समुत्पन्नं गुरुभिःकथितं भो लोका अत्र किमाश्चर्यमस्मिन्संसारे तथाविधं किमपि दुःखं नास्ति यत्सम्यग्भाववतां सिद्धचक्राराधनवतां न नश्यत्यथत्रा श्रीसिद्धचक्रप्रभावतो विशुद्धभावेन तदाराधन-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पराणां चतुर्गतिसत्कानि यानि कानिचित्संसारदुःखानि सन्ति तानि सर्वाण्यपि विलयं यान्ति सिद्धयन्तानि समग्राणि च सुखानि प्रादुर्भवन्तीति गुरुवचनं श्रुत्वा प्रत्यक्षं च तत्प्रभावं निरीक्ष्य लोकाः श्रीसिद्धचक्राराधनं प्रति सादरा जाता तत्स्नात्रजलं च गृहीतवन्तो। मदनसुन्दरी स्वपतिं दिव्यरूपधरं वीक्ष्यात्यर्थं जहर्ष स्वामिनं चोवाच हे स्वामिन्नयं सर्वो गुरुप्रसादोऽस्ति गुरुतुल्योऽस्मिञ्जगतिकोऽपि हितकरो नास्ति यदुक्तं–विदलयति कुबोधं बोधयत्यागमार्थं, सुगतिकुगतिमार्गौ पुण्यपापे व्यनक्ति। अवगमयति कृत्याकृत्यभेदं गुरुर्यो, भवजलनिधिपोतस्तं विना नास्ति कश्चित् ॥१॥ पिता माता भ्राता प्रियसहचरी सूनुनिवहः, सुहृत्स्वामिमाद्यत्करिभटरथाश्वः परिकरः। निमज्जन्तं जन्तुं नरककुहरे रक्षितुमलं, गुरोर्धर्माधर्मप्रकटनपरात्कोऽपि न परः ॥२॥

अथ मदनसुन्दरी कान्ताज्ञां गृहीत्वा सप्तशतकुष्ठिसमीपं गत्वा तेषां शरीराणि स्नात्रवारिणाऽसिंचयत्। ऊम्बरनृपस्य निरोगत्वादिवृत्तान्तश्रवणाच्च श्रीसिद्धचक्रं प्रति सद्भक्तिमतां तेषां कुष्ठिनामपि रोगोपशान्तिर्जाता। श्रीसिद्धचक्रानुभावादूम्बरनृपस्य कुष्ठिनां च रोगोपशमनवृत्तान्तेन तत्र श्री जैनधर्मस्य सद्गुरोश्च महती प्रशंसा जाता। अथप्रत्यक्षंप्रभावदर्शनादूम्बरनृपो जिनदेवगुरुधर्माराधनपरो बभूव। मदनसुन्दरी च बहुभक्त्या गुरोः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्तुतिं विधाय देवगुरुधर्माऽऽसेवनपराऽभवत्। अथैकदा श्री ऋषभदेवदर्शनं विधाय स्वस्थानं गच्छद्भ्यां ताभ्यां-मार्गेऽतीततारुण्या महिला दृष्टा तामुपलक्ष्याऽतीवहर्षवशादद्याकाल आम्रः फलितो यज्जननी दृष्टेति वदन्नुम्बर-कुमारो तस्याश्चरणयोःपपात तत्पत्न्यपि स्वकान्तजननीं ज्ञात्वा चरणयोःपपात स्वपुत्रस्य दिव्यंरूपं दिव्यरुपधरां च पुत्रपत्नीं वीक्ष्याऽऽश्चर्यचकितां स्वजननीं कुमारोऽवोचद् हे मातः सर्वोऽपि तव वध्वाःप्रभावोऽस्तीति प्रोच्य सर्वोऽपिवृत्तान्तःकथितस्तत्समाकर्ण्यातीवानन्दिता माता ताभ्यांप्रशंसापूर्वकमाशिषमदात्। ततःपुत्रप्रश्नाद्माता-प्रोवाच हे पुत्र तदाऽहं त्वां मुक्त्वा वैद्यानयनार्थं कौशाम्बीं गता तत्र वैद्योयात्रार्थं गतोऽस्तीति जनेभ्यो निश-म्याऽहं जिनप्रासादं गत्वा जिनं च नत्वाऽऽसन्नोपाश्रयस्थितं जितेन्द्रियं कृपालुमकषायं ज्ञानिनं मुनिं धर्मं कथ-यन्तमपश्यं तत्र तं प्रणम्याऽहमुपविष्टा धर्मोपदेशान्ते मया पृष्टं हे भगवन्मम पुत्रस्य रोगःकदा यास्यति गुरुणा-प्रोक्तं हे भद्रे तव गमनानंतरं कुष्टिभिः स तव पुत्रः स्वस्वामी कृतस्ततस्तेन मालवदेशाधिपप्रजापालनृपस्य पुत्री परिणीता। पत्नीवचनतश्चगुरुदर्शितं श्रीसिद्धचक्राराधनं कृत्वा तत्प्रभावतः स रोगरहितो दिव्यरूपधरः संजातो गुरुवचनात्सुश्रावकजनपूरितसकलसामग्रीकः स स्वपत्न्या सह धर्मकार्यरतोऽधुनाऽपि तत्रैव

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्थितोऽस्ति। तन्निशम्याऽतीवाऽऽनन्दिताऽहं त्वरितमत्रागता रोहिण्या सह निशाकरमिवाऽऽनन्ददं त्वां-चाऽपश्यं हे पुत्र त्वं तव पत्न्या सह चिरं जीव चिरं नंदाऽद्यप्रभृतिममाऽपि श्रीजिनधर्म एव शरणमस्तु ततःकुमारःस्वजननीं जिनदर्शनं कारयित्वा जननीपत्नीभ्यां सह गुरुं वन्दित्वा धर्मोपदेशं च श्रुत्वा स्वस्थानं समागतस्ततस्ते त्रयोऽपि धर्माराधनरता बभूवुः

अथैकदा ते त्रयोऽपि शुद्धभावपूर्वकं श्रीजिनेन्द्रस्यांगाग्रपूजां विधाय सोपयोगा भावस्तवं कुर्वन्ति इतश्च-स्वपुत्रीदुःखेन दुःखिता रूपसुन्दरी राज्ञी भूपेन सह कलहं कृत्वा स्वबान्धवपुण्यपालगृहं गत्वा सशोकाऽस्थात् तत्र सर्वज्ञवचनसंजातनिर्मलविवेका सा शोकं विहाय तत्रैव जिनदर्शनाय समागात् तत्र दिव्यरूपधरकुमारेण सह भावस्तवं कुर्वाणां मदनसुन्दरीं वीक्ष्याऽऽकृत्याचोपलक्ष्याऽचिन्तयत् किं तया मम पुत्र्या तं कुष्ठिनं त्यक्त्वाऽन्यः स्वामी कृतो। मत्पुत्री जिनेन्द्रशासनकुशला सैवमकार्यं न कुर्यादथवाऽस्मिन्संसारनाटकेनृत्यतां जीवानां किमप्यकार्यं नास्त्यनया कुलांगारभूतया पुत्र्या निर्मलं कुलं जिनधर्मं च कलंकितमीदृगकार्यकरणात्प्रागेव यदिमृताऽभविष्यत्तर्हीदृग् दुःखं मम नाऽभविष्यदेवं विचार्याऽतिशयदुःखात्करुणं रुदनं कुर्वन्ती प्रोवाचाहो



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

धिगस्तु धिगस्त्वकार्यं संजातमकार्यं मदीयकुक्षौ वज्रं पततु यत्र संजाता जिनमतनिपुणाऽपीदृगकार्यमकरो त्तन्निशम्य मदनसुन्दरी स्वजननीं रुदन्तींदृष्ट्वा तस्याश्चहृदयभावं विज्ञाय चैत्यवंदनविधिं समाप्य जननीं हस्तयोजनेन वंदित्वाऽवोचद्धे मातरद्यानन्दस्थाने कस्मात्त्वयाविषादः क्रियतेऽयं एव तव जामाता गुरुदर्शित- सिद्धचक्रानुभावादरोगो दिव्यरुपः संजातोऽस्ति त्वयाचर्यद्विचारितं तत्तु यदिसूर्यः पश्चिमदिश्युदेष्यति तथापि न भविष्यति। जिनमंदिरेऽन्य वार्तया नैषेधिकाभंगदोषः संजायतेऽतस्त्वं चैत्यवन्दनं कृत्वाऽस्माकं गृहं समा- गच्छ तत्र सर्वं कथयिष्यामि. ततश्चैत्यवंदनंकृत्वा रूपसुन्दरी तैः सह तेषांगृहमायाता तत्र तत्पुत्र्या सर्वो वृत्तान्तः कथितस्तन्निशम्याऽतीवानन्दितां तां कुमारजननी प्राह हे सुन्दरि महासत्या तत्त्वज्ञया त्वदीयपुत्र्याऽस्माकं कुल मुद्धृतं जिनधर्मश्च प्रापितोऽतस्त्वं रत्नकुक्षिरसि ययैतादृशं पुत्री रत्नं प्रसूतं. ततो रूपसुन्दरी प्राह हे सखि त्वदी- यपुत्ररत्नस्य वंशादिकं ज्ञातुमिच्छामि तत्प्रसद्य कथय तदा कुमारमाता प्राह हे सखि श्रुणु–अंगदेशे प्रसिद्धा चंपानाम नगर्यस्ति तत्र वैरिगिजेन्द्रपंचाननः सिंहरथाभिधः पृथ्वीप आसीत्तस्य कुंकणदेशेशलघुस्वसा कमलप्रभाभिधा पट्टमहिष्यभूत्तस्याश्चिरेण शुभस्वप्नसूचितः सल्लक्षणधर एकः सुतः संजातो राज्ञा महान्तं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जन्ममहोत्सवं कृत्वा ज्ञातिस्वजनान् भोजयित्वा सर्वेषां चाग्रेऽयमस्माकं राज्यश्रियः पालका भविष्यत्यतोऽस्य बालस्य श्रीपाल इति नाम भवत्विति प्रोच्य नामस्थापना कृता। अथ यदा स बालो द्विसंवत्सरपर्यायः संजातस्तदा तस्य जनकः शूलरोगेण मृतः स्वामिवियोगात्करुणं रुदन्तीं कमलप्रभां मतिसागरमन्त्रीश्वरोऽवोचद् हे मातर्वक्षःस्थलकुट्टनेन करुणरुदनेन च मृताः केऽपि पश्चान्नसमागताः केवलं रुदनेन च राज्यमपि न स्थास्यत्यतो यद्यपि तव बालो बालोऽस्ति तथापि तवाज्ञया तं राज्ये स्थापयामीति मम वांच्छाऽस्तीदमेव च कालोचितं तच्छ्रुत्वा राज्ञ्या तत्प्रतिपन्नं मन्त्रिणा श्रीपालो राज्येऽभिषिक्तःसर्वत्र च तस्याज्ञा प्रवर्तिता पश्चाद् भुपमृतकार्यमपिकृतं ततः सकलराज्यकार्याणि मंत्र्येव करोतिस्म यतः राज्यव्यवस्थां प्रायेण सर्वत्र मन्त्रिण एव कुर्वन्ति। इतश्च श्रीपालस्य पितृव्योऽजितसेनाभिधो राज्यगृहणलालसः सन् सकलराज्यप्रधानपुरुषाणां दानादिनाभेदं विधाय श्रीपालस्यमन्त्रिणश्च वधोपायमचिन्तयत्तन्मन्त्रिणा कथमपि विज्ञाय राज्ञीसमीपं च समागत्य प्रोक्तं हे मातरधुनापुत्ररक्षणं युक्तं तस्मात्त्वं गृहीत्वा गुप्तरीत्येतः कुत्राऽपि याहि पुत्ररक्षणं च कुरु यतो जीवन्नरः पुनरपिराज्यं लभेत। अहमप्यधुनैव व्रजामीति प्रोच्य मन्त्रीश्वरोऽगच्छत्ततो निशामुखे कमलप्रभाऽपि पुत्रं कट्यां



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गृहीत्वा मन्त्रभेदशंकयाऽपरिवारैकाकिन्येव नगराद्बहिर्निर्गत्य पादचारेणैव प्रागदृष्टमार्गा कोमलशरीरा गाढां-धकारवशात्कंटकशर्कराविद्धप्रक्षरद्रुधिरपादा सा क्रूरहिंसकश्वापदव्याप्तां क्रूरहिंसकश्वापदसंचरणशब्दातिभयं-करामटवींप्राप्याऽतिदुःखिता सा पशुपक्षिवृक्षादीन्रोदयन्तीव भृशं रुरोदैवं चाऽचिन्तयद् हा विषमं विधेर्विल-सितमेकतः पतिमरणं राज्यनाश एकाकित्वमन्नवस्त्रादिसकलवस्तुवियोगित्वं चान्यतोऽकृतपादसंचाराया अदृष्टदुःखायाः सुकुमालशरीराया नृपपत्न्या अपि मम गाढांधकारायां निशि बालं कट्यां गृहीत्वा पादचारेणो-न्मार्गगमनं बालरक्षणकरणं शत्रुत्रासश्च हा कुत्र यामि किं करोमि बालस्य मम च कथं रक्षणं कुर्यां ही विधिविलसि तान्यगम्यानि. यदुक्तं—अघटितघटितानि घटयति, सुघटितघटितानि जर्जरीकुरुते । विधिरेव तानि घटयति यानि पुमान्नैव चिंतयति ॥१॥ इत्यादिचिन्तयन्तीमग्रे च गच्छन्तीं तां सूर्योदयसमये बालःप्राह हे मातर्मह्यं-शकरायुतं दुग्धं देहि तदा सदुःखं राज्ञी प्राह हे वत्स तत्कुत आनयाम्यतःप्रभृति यदि सतक्रा तुच्छधान्यपे-याऽपि लभ्येत तथापि वरमिति बालं कथयन्त्याऽटवीमुलंध्य चाग्रे गच्छन्त्या तयाऽग्रे भयंकराकृतिधरः सप्तशत-कुष्टिसमूहो दृष्टस्तं दृष्ट्वा महामूल्याऽलंकाराऽनुपमलावण्याऽबला सा भयकंपितशरीरा मुक्तनिश्वासा सतीत्य-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

चिन्तयद् हा हताऽस्म्येकस्य दुःखस्याऽपि यावदन्तं न यामि तावद् द्वितीयमापतितं । यदुक्तं—एकस्य दुःखस्य न यावदंतं, गच्छाम्यहं पारमिवार्णवस्य । तावद् द्वितीयं समुपस्थितं मे छिद्रेष्वनर्था बहुलीभवन्ति ॥२॥ इति चिन्तयन्तीं भीतभीतां तां वीक्ष्य कुष्ठिनस्तस्याः समीपं समागत्य प्रोचु र्हे सुलोचने त्वं काऽसि निर्भयं वदास्मांस्तव भ्रातॄन् जानीहि. तेषां वचांसि श्रुत्वा विश्वस्ता सा समग्रमपि निजवृत्तान्तमकथयत्त न्निशम्य कुष्ठिनः प्रोचुर्हे भगिनि त्वमस्मासु जीवत्सु कस्मादपि भयं मा चिन्तयेमां वेसरीं समारुह्य विश्वस्ताऽस्माभिः सह समागच्छ तत्समाकर्ण्य तया तथैव कृतमंकस्थबाला पटाच्छादितशरीरा वेसरीवाहना च सा यावत्तैः सह चलिता तावत्सशस्त्रा भीषणाकारा अजितसेनसुभटाः समागत्य कुष्ठिसमूहमपृच्छन् भो काऽपि सबालैकाकिनी राज्ञी युष्माभि र्दृष्टा तदा तैः प्रोक्तमस्माभिरस्मद् देहे संजातः कुष्ठरोगःसुदृष्टोऽस्ति यदि तेन कार्यं तर्हि तूर्णं गृह्णीत तन्निशम्य तै र्ज्ञातमेते कुष्ठिनः स्वयंरोगोद्विग्ना अस्मभ्यं कुष्ठरोगं दातुमिच्छान्तिकिंच सर्वेऽप्यविद्यमानमेवयच्छन्तीति र्विचिन्त्य कुष्ठरोगभयात्त तूर्णं ततः पलायितास्ततः सा कमलप्रभा तैः सह निर्भया सुखेन सुतं पालयन्त्यतिष्ठत्ततः क्रमेण गृहीतविद्यः सकलकलाकुशलः स बालो यौवनं प्राप्तः कुष्ठिसंगाच्च तस्यशरीरे कुष्ठरोगः



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

संजातस्तदा कमलप्रभा वैद्यार्थं कौशांबीं गता तत्र ज्ञानिगुरुमुखात्पुत्रस्य वृत्तान्तं श्रुत्वा हर्षिताऽत्रागता हे सखि साऽहं कमलप्रभाऽयं च मम पुत्रः श्रीपालो यस्तव जामाता संजातस्तन्निशम्य स्वजामातु र्निर्मलवंशत्वेन नृपेन्द्रपुत्रत्वेन चाऽतीवहर्षिता रूपसुन्दरी स्वपुत्र्या भाग्यं प्रशशंस ततः स्वबन्धुसमीपं गत्वा सर्वं वृत्तान्तमकथय त्तदा सोऽप्यत्यर्थंहर्षितः सन्साडंबरः श्रीपालसमीपं गत्वा ससन्मानंहस्तिन उपरि समुपवेश्य सकुटम्बं तं महोत्सवेन स्ववेश्म समानयत्तत्रस्थितः पुन्यपालनृपपूरितमनोरथः सकुटम्बः श्रीपालो धर्मकार्यैकरणपरः सुखेन कालं गमयति । अथैकदा दिव्यसुखमनुभवन्तौ मदनाश्रीपालौ प्रासादगवाक्षस्थितौ विविधवाद्यगेययुतं नृत्यं पश्यन्तौ स्तस्तस्मिन्नवसरे स्तोक परिवारोऽश्वारूढः प्रजा-पाल भूपाल स्तत्प्रासादसमीपान्निर्गतस्तेन दिव्यरुपधरौ दिव्य सुखमनुभवन्तौ तौ वीक्ष्य चमत्कृतेन सुष्ठुविलोकितं तदा स्वपुत्रीं समुपलक्ष्य हृदि संतप्तेन तेन विचारितं हा कामवशयाऽनया कुपुत्र्या स्वंपरिणीतं कुष्टिपतिं त्यक्त्वाऽन्यं नवंपतिं विधाय मम निर्मलं कुलं कलंकितं प्राक् तु कोपवशगेन मयाऽयुक्तं कृतं पश्चात्कामवशवर्तिन्याऽनयाऽयुक्तं कृतमतोमामिमां च धिगस्तु धिगस्त्वित्यादि विचारेणऽत्यर्थं विषण्णं भूपतिं वीक्ष्य पुण्यपालस्तूर्णं तत्रागत्य नृपंप्रणम्य श्रीसिद्धचक्रमाहात्म्ययुतं मदना-



P. P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्रीपालयोःसर्वं वृत्तान्तमकथयत्तन्निशम्याऽतीवविस्मयस्मेरमानसः प्रजापालभूपो हृदि जिनधर्मं पुत्रीपुण्यं च श्लाघमाणः पुण्यपालेन सह मदनाश्रीपालयोः समीपं समागच्छत् विनीताभ्यां ताभ्यामभ्युत्थाय प्रणतः ससत्कारं चोचितस्थाने समुपवेशितस्तदाऽऽकृत्याकुष्टिनं समुपलक्ष्य सलज्जो भूपःपुत्रीं प्राह हे वत्से त्वं धन्या प्रकृष्टभाग्यवती तत्त्वज्ञा सविवेका चाऽसि यस्या मम कोपेन कुष्ठिवरप्राप्तावपीदृग् धैर्यं। हे वत्से त्वया मम कुलं त्वन्माता जिनधर्मश्च प्रोज्ज्वलो विधत्तस्त्वया प्रोक्तं च सर्वमपि सत्यं संजातं। गर्वगतविवेकेन कोपान्धेन च मया मिथ्यावादपूर्वकमकार्यं कृत्वा तुभ्यं महादुःखं प्रदत्तं तं मदीयापराधं क्षमस्व। तदा निर्मलविवेका सा विनयेनाऽवदद् हे तात त्वं खेदं मा कुरु मत्कर्मणैव मम सर्वं सुखं दुःखं च संजातं त्वया मह्यं दुःखं दत्त मित्यहं नैवमन्ये यतः सुखं दुःखं च कोऽप्यन्यस्मै दातुं न शक्नोति सर्वेऽपि स्वकृतकर्मणैव सुखदुःखं प्राप्नुवन्ति। हे तात येन सर्वज्ञोक्ततत्त्वं ज्ञातं तस्य जीवकर्मस्वरूपज्ञानं त्वरितं संजायतेऽ तस्त्वमपि परमहितकर्जिनोक्तत-त्त्वज्ञाने यत्नं कुरु सकलदुःखहरं जिनधर्मं च स्वीकुरु। तत्पुत्रीवचनं श्रुत्वा प्रत्यक्षं दृष्टजिनधर्ममाहात्म्येन राज्ञा जिनधर्मं स्वीकृत्य संतुष्टेन कथितं यन्मया सिंहरथनरेन्द्रपुत्रः पुत्रीपतित्वेन



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

लब्धस्तच्च प्रस्तरकृते करे प्रसारिते सहसा चिन्तामणि र्करे समागतः। ततो भूपतिना स्वापराधं क्षमयित्वा रूपसुन्दरीं प्रसन्नीकृत्य स्वगृहं च समानयितुं सकलत्रं श्रीपालं महताऽऽग्रहेण हस्तिस्कंधं समारोप्य सकलहर्षितस्वजनेन प्रहृष्टेन तेन महामहेन स्वगृहमानीतस्ततस्तस्मै प्रवरं प्रासादं दत्वा धनधान्यप्रवरवस्त्रालंकारहस्त्यश्वरथपदातिदासदास्यादिकं सर्वमपि दत्तं तदा तस्मिन्नगरे सत्त्वशीलवत्याः पुन्यशालिन्यास्तत्त्वज्ञाया मदनसुन्दर्याः सकलजीवपरमहितकरजिनधर्मस्य च महती प्रशंसा संजाता। सपरिवारः सुरकुमार इव नृपदत्तावासे वसन्सुखानि भुंजानो धर्माराधनपरः श्रीपालः सुखेन कालं गमयति। अथैकदा मातंगहयस्यन्दनसुभटादिपरिवृतो दिव्यरूपः श्रीपालः क्रीडार्थ नगरमध्यभागान्निर्गच्छन् सानन्दैः पौरैः प्रासादांश्चन्द्रशालाश्चारुह्य दृष्टस्तदैका मुग्धा बाला स्वमातरमपृच्छद् हे मातरयं दिव्यरूपधरःकः प्रयाति किमसौ कामदेवो ब्रह्मा वा विष्णु र्वा रामो वा सुरकुमारो वा चक्री वाऽस्ति तन्निशम्योच्च र्माता प्राह हे मुग्धे त्वमेतावदपि न जानास्ययं प्रजापालनृपस्य श्रीपालनामा जामाताऽस्ति तदा तद्वचनं श्रुत्वा श्रीपालो वज्राहत इवसंजातदुःखो विच्छायवदनः संस्त्वरितं स्वप्रासादं समागतस्तं तथाविधं दृष्ट्वा व्याकुला माता प्राह हे वत्स



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

किं तव शरीरेऽम्ब कोऽपि व्याधिः समुत्पन्नोऽस्त्यथवा वासवतुल्यस्य तव केनाऽप्याज्ञा खंडिता, पराभवो वा कृतोऽस्त्यथवा केनचित्कन्यारत्नेन तव हृदये स्थानं कृतमस्ति तत्र पत्न्या वा किमप्यविनयाचरणंकृतमस्ति तत्तु तस्यां न संभवति तस्मात्कथय वत्स कस्माद्विमनस्कोऽसि तदा श्रीपालः प्राह हेऽम्ब त्वदुक्तकारणेष्वेकमपि कारणं नास्ति। परं हे मातरत्र मां सर्वेऽपि श्वशुरनाम्नैव समुपलक्षयन्ति तदेव मम मनसि महद्दुःखमस्ति यतो ये स्वगुणैः प्रख्यातिंयान्ति त उत्तमाः पितृगुणैश्च प्रख्यातिं यान्ति ते मध्यमा मातुलगुणैश्च प्रख्यातिं यान्ति तेऽधमाः श्वशुरगुणैश्च प्रख्यातिं यान्ति तेऽधमाधमाःप्राज्ञैः प्रोक्ताः सन्ति तस्मादत्राहं न स्थास्यामि तन्निशम्य माताऽवोचद् हे वत्स तर्हि श्वशुरसैन्यं गृहीत्वांऽगदेशं च गत्वा स्वपितृराज्यं च समादाय मां निःशल्यां कुरु तदा श्रीपालोऽवदत् श्वशुरसैन्यबलेन पितृराज्यगृहणे ममापयश एव स्यादतोऽहं देशान्तरं गत्वा स्वभुजबलेनैव घनं सैन्यं च मेलयित्वा स्वपितृराज्य समादास्यामि ततोहेऽम्ब महां विदेशगमनाज्ञां देहि तदा माता प्राह हे वत्स देशान्तरगमनं सुदुष्करमस्तित्वं सरलस्वभावः सुकुमालोऽसि तन्निशम्य श्रीपालेनप्रोक्तं हे मातरीदृग्वचनं मा ब्रूहि यतो यावत्सत्ववन्तः कार्यं नस्वीकुर्वन्ति तावदेव-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दुष्करत्वमस्ति ततो माता प्राह यदि देशान्तरगमने तव निश्चयोऽस्तितर्हि त्वयासहाऽऽवामागमिष्यावो यतस्त्वां विनाऽऽवयोः क आधारोऽस्ति तदा कुमारःप्राह हे मात दशान्तरगमने महिला जनः पादबन्धनमेवाऽस्ति तस्माद् युवामत्रैव तिष्ठतं धर्मध्यानं च कुरुतं तच्छ्रुत्वा तस्य च विदेशगमननिश्चयं च ज्ञात्वा तस्मै मात्राऽऽशिर्वादयुताऽऽज्ञादत्ता। अथ मदनसुन्दरी स्वपतिं प्राह हे स्वामिन्नहं तु त्वदनुयायिन्येव भविष्यामि तव शरीरच्छायावत्किमपि भारं न करिष्यामि यतो ज्वलनतोऽपि प्रियविरहाग्निरतिशयेन विषमदुःखदोऽतो हे नाथ मां त्वया सार्धं नय तन्निशम्य श्रीपालोऽवदद् हे प्रिये त्वया सत्यमुक्तं तथाऽपि स्त्रीजनो विदेशे प्रतिपदं विघ्नकरोऽस्ति। तस्मात्त्वं स्वश्वश्रूसेवापरा धर्मध्यानमग्नाऽत्रैव तिष्ठ। तदा मदना प्राह हे प्राणप्रिय यद्यपि सत्यः स्वामिवियोगं नेच्छन्ति तथाऽपि तव वचनं मम प्रमाणं मम देहपंजरमत्रैव स्थास्यति परं प्राणास्तु त्वया सहैव समागमिष्यन्ति। अथ हे नाथ देशान्तरं गच्छता त्वया परमहितकरं नवपदध्यानं कदापि न मोक्तव्यं नवां नवां च भार्यां परिणयता त्वयेयं त्वच्चरणकिंकर्यपि कदाचित्स्मरणीया तूर्णंचाऽप्रमादवता भवता पश्चात्समागत्य भवन्मुखचन्द्रदर्शनेन मह्यमानंदो दातव्यो। यावच्च भवतां विर-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हस्तावदहमेकाशनं भूमीशयनं स्नानपरिकर्मत्यागं निश्चलमनःपूर्वकं च श्रीनवपदध्यानं करिष्यामि। ततो सुमुहूर्ते गमनावसरे माता तिलकमंगलं कृत्वा प्राह हे वत्स कल्याणकरं नवपदध्यानं त्वया सदा कर्तव्यं दुर्जनानां विश्वासो न कार्योऽप्रमादिना च भाव्यमहमपि त्वदीयश्रेयःकृते नित्यं नवपदध्यानं करिष्यामि। अथ मातृभार्यावचनामृतसिक्तः प्रसन्नचितो गृहितासिः श्रीपालकुमारो स्वजननीं प्रणम्य प्राणप्रियां च संभाष्य चन्द्रनाडिकायां चलन्त्यां प्रथमं दक्षिणेतरपादक्रमणं कृत्वा नवपदध्यानपूर्वकं विदेशप्रयाणमकरोत्। अथानेकग्रामनगरपुरादीनि विविधाश्चर्याणि च पश्यन् मृगपतिरिव निर्भयःश्रीपाल एकस्य पर्वतस्य समीपस्थं नन्दनवनतुल्यं वनं प्राप्तस्तत्र विविधसरसपुष्पफललतावृक्षश्रेणीः पश्यन्नेकस्य सुन्दराकारस्य चंपकपादपस्य समीपं समायातस्तत्र चंपकतरोस्तले सुन्दराकृतिं मन्त्रजपं कुर्वन्तमेकं नररत्नं ददर्श ततःश्रीपालं दृष्ट्वा मन्त्रजपं पूर्णीकृत्य विनयपरेण तेन प्रणामं कृत्वा प्रोक्तं हे सत्पुरुष सुष्ठु संजातं यत्तव समागमनं जातमद्य मम कार्यं सिद्धं तदा सज्जनस्वभावः श्रीपालः प्राह मत्सदृशं किमपिकार्यं चेत्तर्हि कथय तदा तेन मन्त्रसाधकेन प्रोक्तं तुष्टेन गुरुणा मह्यमेका विद्या दत्ताऽस्ति तत्साधनार्थं महाप्रयासः कृतः



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

परमुत्तरसाधकेन विना सा सिद्धिं न याति तस्माद् हे सत्पुरुष त्वं मम विद्या साधन उत्तरसाधकीभूय सहायं कुरु तदा श्रीपालःप्राह परोपकारार्थं तु पूर्वपुरुषै र्धनप्राणराज्यादिकमपि समर्पितमस्ति तदग्र इदं कियन्मात्रमतो हे सज्जन त्वं निर्भयचित्तो विद्यां साधयाऽहमुत्तरसाधको भवामि । यतःसत्पुरुषाणां शरीरादिविभूतिः परोपकारायैवाऽस्ति तस्मात्तेन तथा प्रोक्तं यदुक्तं—शास्त्रंबोधाय दानाय, धनं धर्माय जीवितं वपुः परोपकाराय, धारयन्ति मनीषिणः ॥१॥ पिबन्ति नद्यः स्वयमेव नांभः, स्वादन्ति न स्वादुफलानि वृक्षाः । पयोमुचां किं क्वचिदस्ति शस्यं, परोपकाराय सतां विभूतिः ॥२॥ दधत्यार्त्तं सुखीकर्तुं, सन्तः संतापमात्मना । सुदुःसहं सहंते हि, तरवस्तपनातपं ॥३॥ मनसि वचसि काये पुण्यपीयुषपूर्णा—स्त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः । परगुणपरमाणून्पर्वतीकृत्य नित्यं, निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ॥४॥ वदनं प्रसादसदनं, सदयं हृदयं सुधामुचो वाचः करणं परोपकरणं येषां केषां न ते वन्द्याः ॥५॥ ततः सत्पुरुषशिरोमणिः श्रीपाल उत्तरसाधकोऽभू-त्तदातत्पुण्यपुरुषस्य सहायतया विद्यासाधकस्य विद्या त्वरितं सिद्धिं प्राप्ता ततोऽतितुष्टेन तेनाऽगृह्णतेऽपि कुमाराय साग्रहमौषधियुगलं दत्तं कथितं चैतयोरेका जलनिस्ता-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रिणी द्वितीया च शस्त्रनिवारिण्यस्त्येतदौषधीयुगलं सुवर्णरजतताम्रमये यन्त्रे प्रक्षिप्य स्वभुजोपरि बन्धनीयं। ततःकुमारविद्याधरौ द्वावपि पर्वतनितंबस्थानं गतौ तत्र सुवर्णरससिद्धिं कुर्वद्भिःपुरुषै विंद्याधरं प्रति प्रोक्तं हे स्वामिंस्त्वद्दर्शितविधिनाऽस्मासु स्वर्णरससिद्धिं कुर्वत्स्वपि स्वर्णसिद्धि र्न भवति। तदा पर सुखेनाऽऽनन्दं मन्यमानेन सज्जनस्वभावेन श्रीपालेन तैरप्रष्टेनाऽपि सहायकरणेच्छुना प्रोकतं युयं मम समक्षं साधयत। यतः सन्त एवं विधा एवाऽन्यथा परसमृद्धयर्थं स कथं सानंदो भूत्वैवं कथयेत्

यदुक्तं—तुष्यन्ति भोजने विप्रा, मयूराघनगर्जितैः। सज्जनाः परसंपत्त्या, खलाः परविपत्तिभिः ॥१॥

उपकर्तु प्रियं वक्तुं, कर्तु स्नेहमकृत्रिमं। सज्जनानां स्वभावोऽयं केनेन्दुः शिशिरीकृतः ॥२॥

कुमारोक्तं श्रुत्वा तैस्तथैव कृतं कुमारसाहाय्येन शीघ्रं सुवर्णसिद्धिः संजाता तदाऽतिहर्षितैस्तै र्धातुर्वादिपुरुषैः कथितं हे सत्पुरुष निःस्वार्थोपकारिणस्तव सहायत्वेनैवैषा स्वर्णसिद्धिः संजाता तस्मादेतत्सकलमपि स्वर्णं प्रसादं कृत्वा त्वमेव गृहाण कृतज्ञशिरोमणीनां तेषां तद्वचनं निःस्वार्थिश्रेष्ठेन कुमारेण न स्वीकृतं तदा तद्गुणाकृष्टै स्तैर्महताग्रहेण तस्य वस्त्रांचले स्तोकं सुवर्णं बद्धं।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततोऽग्रे चलन्कुमारो विविधाश्चर्याणि पश्यन् परोपकारकार्याणि च कुर्वन् क्रमेण भृगुकच्छनगरं समागतः। तत्रतेन सुवर्णव्ययेन वर्यांशुकाभूषणशस्त्रादिकं गृहीतं स्वर्णरूप्यताम्रमये च यंत्रे कारयित्वा तयो रौषधी प्रक्षिप्य स्वभुजयो र्बद्धे ततःस विविधाश्चर्याणि पश्यन् यथेच्छं लीलया तस्मिन्नगरे भ्रमति सुखानि चानुभवति। इतश्च तस्मिन्काले कोशाम्बीनगरीवास्तव्यो महाधनाढयत्वाल्लोककृतकुबेराऽपरनामा धवलनामा श्रेष्ठी प्रभूतस्वर्णकोटिव्ययगृहीतक्रयाणकानि गृहीत्वा बहुव्यवहारिपरिवृतो व्यापारार्थं भृगृकच्छं समागतस्तेन तत्र तानि क्रयाणकानि विक्रीयाऽनेकद्रव्यकोटिमितो लाभो लब्धस्तथाऽपि तस्य तृप्ति र्न जाता तस्माद् महालाभार्थं तत्रस्थानि क्रयाणकानि बहुस्वर्णकोटिव्ययेन गृहीत्वा स्वपंचशतप्रवहणानि भृतानि। यतो लोभस्तथाविध एव। यदुक्तं—धनहीनः शतमेकं, सहस्रंशतवानपि। सहस्राधिपति र्लक्षं, कोटिं लक्षेश्वरोऽपिच ॥१॥ कोटीश्वरो नरेन्द्रत्वं, नरेन्द्रश्चक्रवर्तिताम्। चक्रवर्ती च देवत्वं, देवोपीन्द्रत्वमिच्छति ॥२॥ इन्द्रत्वेऽपि हि संप्राप्ते, यदिच्छा न निवर्तते। मूले लघीयांस्तल्लोभः, शराव इव वर्धते ॥३॥ यद् दुर्गामटवीमटन्ती विकटं क्रामन्ति देशान्तरं, गाहन्ते गहनं समुद्रमतनुक्लेशां कृषिं कुर्वते। सेवन्ते कृपणं पतिं गजघटासंघट्टदुःसंचरं, सर्प्पन्ति

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रधनं धनांधितधियस्तल्लोभविस्फूर्जितं ॥४॥ धवलश्रेष्ठिनस्तेषु यानपात्रेषु कानिचिदतिमहतानि सप्तभूमिकानि, कानिचिद् मध्यमप्रमाणानि, कानिचिच्च लघूनि यानपात्राणि विविधाभिधानान्यासन्। तेषां रक्षणार्थे श्रेष्ठिना सशस्त्राः सशौंडीरा दशसहस्राणि सुभटा गजतुरंगमरथविविधशस्त्राणि च तेषु स्थापितानि। प्रभूतातपत्रचामरध्वजपताकाद्यलंकृतानि भृतपोतचालसामग्रीवारीन्धनशंबलादीनि समारूढसांयात्रिकानेकजातीयभृत्यनाविकादीनि तानि यानपात्राणि जंगमानि पुराणीवाऽदृश्यन्त। अथ शुभमुहूर्ते धवलश्रेष्ठी नरेन्द्राय बहुमुल्यमुपायनं दत्त्वा तदाज्ञां च लात्वा विविधवाद्यनिर्घोषेषु जायमानेषु सपरिवारो प्रवरप्रवहणं समारूह्य सर्वजनेभ्यः शिक्षांदत्वा नाविकान् प्राह भो निर्यामका रत्नद्वीपं प्रति पोतांश्चालयत। ततस्तैः पोताश्चालिता अपि नाचलंस्तदा तैः पोतचालनार्थं भूर्युपायाः कृतास्तथापि यदा तेनाचलंस्तदा चिंतामग्नमानसो विच्छायवदनो धवलेभ्यः पोतादुत्तीर्य त्वरितं शीकोतर्यभिधदेवीमंदिरं गत्वा तरंडस्तंभनकारणमपृच्छत्तदा-देव्याः पूजकेन स्वेष्टगृहणपूर्वकं ध्यानविधिं विधाय प्रोक्तं तव पोता देवतया स्तंभितानि सन्ति द्वात्रिंशलक्षणधरपुरुषस्य बलिदानं विना मुक्ता न भविष्यन्ति तन्निशम्य श्रेष्ठी भूपसमीपं गत्वा बहुमूल्योपायनेन

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भूपं संतोष्य पोतवृत्तान्तं च प्रोच्य द्वात्रिंशल्लक्षणधरं पुरुषं बल्यर्थमयाचत। तदा संतुष्टेन धरापेन प्रोक्त-
मत्र यः कोऽपि निःस्वामिको वैदेशिको भवेत्तं सुखेन गृहाण किंत्वन्यो न गृहणीयस्ततो धरापालादेशं प्राप्य
श्रेष्ठिना समादिष्टाः सुभटास्तादृशपुरुषगवेषणार्थं नगरे भ्रमन्तः श्रीपालं तादृशं वीक्ष्य धवलेभ्यसमीपं
समागत्य तद्वृत्तान्तं प्रोचुस्तदा धवलःप्राह तं शीघ्रमानयत येन तस्य बलिं दत्वेतः शीघ्रं गच्छेम तच्च् श्रुत्वा
ते सुभटा लीलया चत्वरहट्टसमासीनश्रीपालसमीपं समागत्य प्रोचू रे रे शीघ्रं समागच्छाऽद्य त्वयि रुष्टो
धवलधनी देवतायै तव बलिदानं दास्यति प्राग् मह्यं न कथितमिति पश्चाद् मा कथयेस्तन्निशम्य श्रीपालोऽप्यवोचद्
रेरे मूर्खाः कुत्राऽपि किं केसरिणो बलिः क्रियतेऽतस्तस्य धवलपशोरेव बलि र्भविष्यति तन्निशम्य ते यावत्किं-
चिद् बलं दर्शयितुं लग्नास्तावत्कुमारकृतसिंहनादेनाऽतीव त्रस्ताः सन्तो पलायितास्ततो धवलविज्ञप्त्या
नरपतिना स्वसैन्यं कुमारग्रहणार्थं मुक्तं तत्सैन्यमपि कुमारेण क्षणेन निर्जितं तदा धवलेन स्वदशसहस्र-
सुभटाः समादिष्टास्तेऽपि नृपसैन्येन सह कुमारग्रहणार्थं समागत्य तं कुमारं परितोऽवेष्टन्त तदा धवलः प्राह भो
भो वीरा अस्याऽत्रैव वधं कृत्वा देवतायै वलिं प्रयच्छत येन सा तूर्णं संतुष्टा भवेत् तच्च् श्रुत्वा सैन्यद्वयसुभट-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मेघाः परितो विविधशस्त्रजलवर्षां कृत्वा श्रीपालदेहधरामाच्छादयामासुस्तथापि महौषध्यातिकठिनत्वा-नुभावात्तस्या वृष्टया विविधशस्त्रजलानि श्रीपालदेहधरान्तः प्रवेशं कर्तुं नाशक्नुवन्नथातीवबलिष्ठकुमारो द्वाभ्यां सैन्याभ्यां युध्यमानः कातराणां हृदयान्यकम्पयत्स्वशरैश्च दयालुत्वात्केषांचिदपि प्राणान्नाहरत् किन्तु केषांचिच् श्मश्रूणि केषांचित्कर्णानि केषांचित्केशान् केषांचिद् नाशिकाः केषांचिच्च शस्त्राणि सर्वेषां च धैर्येण सह संग्रामेच्छामहरत्तस्मिन्संगरे बहुसुभटैः पलायनं कृतं केचिद्रथ्यां प्रविष्टाः केचिदापणान् प्रविष्टाः केचिन्मृतवन्मूर्च्छिताःसन्तस्तत्रैव पतिताः केचिद्रुधिरं वमन्तस्तत्र पतिताः केचित्प्रोचुर्वयं कातराः स्मोऽतो-ऽस्मान्मुञ्च केचिन्मुखे तृणं जगृहुः केचिच्च प्रोचुरस्माकंकोऽपि दोषो नास्ति यतो वयमुदरार्थिनोऽनाथा अशरणा अतोऽस्मान्मा मारय तदा श्रीपालस्यामानुषं शौर्यं निरीक्ष्य पौरा हृदि चमत्कृता धवलश्रेष्ठी चाचिन्तयदनेन पराक्रमेणनाऽयं मनुष्यः किन्तु देवो विद्याधरोवा भविष्यत्यहं च वणिगस्म्यतोऽनेन सह विरोधकरणं न युक्त मितिविचार्य वणिग्बुद्धिः स कुमारसमीपं समागत्य तच्चरणयोर्निपत्य हस्तौ च योज-यित्वाऽवोचद् हे पराक्रमसमुद्र महापुरुष मयाऽज्ञेनाऽविनयेन यत्त्वाऽपराधः कृतस्तत्क्षमस्व मदीयां चैकां-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विज्ञप्तिं शृणु मदीययानपात्राणि कयाचित् क्षुद्रदेव्यास्तंभितानि तानि केनाऽप्युपायेन रत्नद्वीपं प्रति चालयित्वाऽस्मानस्माद् दुःखान्मोचय तदा शान्तचित्तेन कुमारेण प्रोक्तं भो श्रेष्ठीन्नस्य कार्यस्य किं मूल्यं दास्यसि तदाश्रेष्ठी प्राह दीनारलक्षं दास्यामि कुमारेण तत्प्रतिपन्नं ततः सानन्दवदनो जनवृन्दपरिवृतः कुमारो धवलेन सार्धं मुख्यप्रवहणं समारूढः सर्वे निर्यामकाः स्वस्वकार्ये सावधानाः संजातास्तदा श्रीपालेन श्रीसिद्धचक्रध्यानं विधाय सिंहनादः कृतस्तं श्रुत्वा हतप्रभावा कुमारप्रतापसहनाशक्ता सा दुष्टदेवी पलायिता पोताश्च चलिताः सर्वे पोतलोकाः सानंदा जाता गीतनृत्यवाद्यशब्दवर्द्धापनिकादिकमानन्ददं कर्तव्यं प्रवृत्तं तदाऽत्यंतानन्दितो धवलेभ्योऽचिन्तयदयं कोऽप्यचिन्त्यमाहात्म्यनिधिश्चिन्तामणितुल्यो महापुरुषो भाग्येन मया लब्धः स यदि मया सार्द्धंसमागच्छेत्तर्हि तु मम महद्भाग्यमस्य प्रभावेण च मम विघ्नमपि कदापि न भवेदिति विचिन्त्य कुमारसमीपं गत्वा प्रणम्य दीनारलक्षं च दत्वाऽवोचद् हे माहत्म्यनिधे मया प्रतिसुभटं वार्षिकमेकं दीनारसहस्रं दत्त्वा प्रचंडशौर्यवन्तो दशसहस्राणि सुभटाः संग्रहीता यदि त्वमपिमया सार्धं समागच्छेस्तर्हि तुभ्यं वाञ्छितं वेतनं ददामि तदा श्रीपालःप्राह हे श्रेष्ठिंस्त्वं दश सहस्रसुभटानां च यावद्वेतनं ददासि ताव-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

न्मह्यमेकाकिने यदि दातुमिच्छसि तर्हि वद तदा धवलोऽचिन्तयदहोऽयोग्यं मार्गितमनेन कथमेकाकिन
अस्मै दीनारकोटिंदद्यामिति विचिन्त्याऽकथयद् हे महाभाग्याऽहं वणिगस्मि तस्मा-तुभ्यमेतावद् दातुं न
शक्नोमि परं दश सहस्राणि दास्यामि तदा कुमारःप्राह हे श्रेष्ठिन्नहमपि तव दासो भवितुं नेच्छामि परं मम
देशान्तरदर्शनवांच्छाऽस्ति यदि भाटकं गृहीत्वा तव पोते स्थानं दद्यास्तर्हि समागच्छेयं तन्निशम्यात्यर्थं
हर्षितो धवलोऽवदत्प्रतिमासं दीनारशतं गृहीस्यामि तच् श्रुत्वा कुमारः प्रागेव मासस्य भाटकं दत्वा तत्र प्रवहणे
सुखेन स्थितोऽथ धवलादेशेन रत्नद्वीपं प्रति तरंडाश्चलिताः कुमारोगवाक्षस्थितःसन् विविधमकरसुसुमार-
मत्स्यादिजलचरजीवाश्चर्याणि पश्यति पवनानुकुल्येन पोतास्त्वरितगत्या चलन्ति स्तोककालेनैव समुद्र-
मार्गव्यवस्थानियोजितः पंजरस्थितः पुरुष एवमवदत् भो भो लोका यदि जलेन्धनादीनांकार्यं तर्हि बबरकुलं
समागतं तच् श्रुत्वा लब्धधवलादेशै र्नाविकै र्बबरकुले तरंडाःस्थापिताः सर्वलोकाःपोतेभ्य उत्तीर्यैनस्ततो
भ्रमन्तिस्म धवलधन्यपि दशसहस्रसुभटैरुत्तीर्णस्तदा तेषां महान् कोलाहलःसंजातस्तं श्रुत्वा बबराधिपतेः
करग्राहिणः समागतास्तैः करो याचितः परं स्वसुभटबलगर्वितेन धवलेन नार्पितस्तदा तेषां परस्परं महान्

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कलहः संजातो धवलसुभटैश्च पराभवितास्ते करग्राहिणः स्वं पुरं समागत्य. महाकालाभिधं भूपमकथयंस्त न्निशम्यक्रुद्धो भूमीपालः प्रभूतसैन्येन सह तत्र समागतःकरश्च याचितस्तथापि श्रेष्ठिना न दत्तस्तदा तेषां महासंग्रामःसंजातस्तस्मिन् संग्रामेभूपसैन्येन पराभविताःश्रेष्ठिसुभटाः परितः पलायिता धवलश्रेष्ठी च पादपे बद्धस्ततः पृथ्वीपः पोतेषु स्वपुरुषान् स्थापयित्वा स्वनगरं प्रत्यगच्छत्तत्सर्वं वीक्ष्य कुमारःप्राह भो श्रेष्ठिन्दीनारकोटिवेतनं दत्वा संग्रहीतास्ते सुभटा अधुना कुत्र गताःकथं ते रक्षणं न कुर्वन्ति तदाऽधोमुखो तरुबद्धो धवलोऽवदद् भोस्तवाऽधुना क्षतेषु क्षारक्षेपणवन्मृतेषु मारणवत् दग्धेषु च स्फोटकदानवत्कथनं न युक्तं तदा कुमारःप्राह हे श्रेष्ठिन्नद्यापि चेत्तत्सर्वं तुभ्यं कोपि पश्चाद्दापयेत्तर्हि त्वं तस्मै किं दद्याः तदा धवलःप्राह भो एतन्न संभवे-तथापि यःकोऽप्येवं कुर्या-तस्मा अहं सर्वप्रवहणवि-तस्यार्द्धं दद्यामत्र परमेश्वरः साक्ष्यस्ति तत्समाकर्ण्य कुमारो बद्धकवचोभयपार्श्वतूणीरो धनुर्गृहीत्वा तूर्ण बबराधीशसमीपं च गत्वाऽवोचद् भो वीर त्वं पश्चादागच्छ मया सह युद्धं कुरु येन सैन्येन सह ते तेजो हरेयं ममैकाकिनोऽपि करौ पश्याऽन्यच्च त्वादृशः प्राघूर्णिकोऽस्मदीयगृहं समागतः सोऽस्मदीयहस्तकृतसुखभक्षिकास्वादनं विना कथं गच्छेत्तन्निशम्य महा-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कालेन पश्चाद् वीक्षितं तदा तेन रूपनिर्जितकामं शुभलक्षणधरमेकं तरुणं वीक्ष्य प्रोक्तं भोस्त्वमधुना-सौन्दर्ययुक्ताकृति र्वरलक्षणधरो बाल एकाकी चासि तस्मादकाले मरणं कथमिच्छसि त्वं स्वस्थानं गच्छ बालस्य तव युद्ध करणं न युक्तं तन्निशम्य कुमारःप्राह हे भूप लघुत्वबृह-त्वाभ्यांबलनिर्णयो न भवति यस्मिंस्ते-जोऽस्ति स बलवान्। यदुक्तं–हस्ती स्थुलतनुःसचांकुशवशः किं हस्तीमात्रोंऽकुशः, दीपे प्रज्वलिते प्रणश्यति तमः किं दीपमात्रं तमः। वज्रेणाऽपि हताः पतन्ति गिरयः किं वज्रमात्रो गिरि–स्तेजो यस्य विराजते स बलवान् स्थूलेषु कः प्रत्ययः ॥१॥ तस्मात्संग्रामे वचनाडंबरकरणं न युक्तं चेत्र् शूरोऽसि तर्हि संग्रामं कुरु तस्य शौर्ययुक्तवचनानि श्रुत्वा क्रुद्धेन महाकालनृपेण युद्धार्थं सैनिकाः प्रेरितास्तै र्निरंतरशरवृष्ट्या कुमारः समाच्छादितस्तीक्ष्णकुंतकरवालादिशस्त्राणामपि तदुपरि प्रहाराःकृता स्तथापि श्री सिद्धचक्रौषधि-प्रभावात्तस्य शरीर एकमपिशस्त्रं न लग्नं कुमारमुक्तशरैश्च ताडिताः केचित्पतिताःकेचित्पलायिताः केचिन्मूर्च्छिताः केचिच्च युद्धकरणासमर्थाः संजातास्तदा स्वसैन्यं भग्नं वीक्ष्याऽतीवकुपितो भूपःकुमार-वधार्थं बाणान्मुंचन् करिस्कंधारुढोऽधावत्तदा कुमारस्तं स्वशरवृष्ट्या व्याकुलीकृत्य करिस्कंधात्पातयित्वा



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दृढबन्धनै र्बबन्ध धवलश्रेष्ठिसमीपं च समानयत् । धवलवत्पृथ्वीपस्याप्यन्यथाचिन्तितमन्यथा संजातं यतः श्रीपालवत्केषांचिदेव पुण्यवतां स्वचिन्तितं संजायते सर्वेषां न संजायते. यदुक्तं–अन्यथाचिन्तितं कार्य–मन्यथैव हि जायते । बलवान् विधिरेवात्र कार्या नैव विचारणा ॥१॥ रिक्तोऽहमर्थैरिति मा विषद, पूर्णोऽहमर्थैरिति मा प्रसीद । रिक्तं च पूर्णं भरितं च रिक्तं, करिष्यतो नास्ति विधेर्विलंबः ॥२॥ नृपं बद्धंवीक्ष्य नृपपुरुषाः पलायिताः कृतबन्धनमुक्तः श्रेष्ठीकरवालं गृहीत्वा भूपवधार्थमधावत्तदा श्रीपालस्तं निवार्यावोचद्धे श्रेष्ठिन्नुपविश त्वदीयं बलं मया पूर्वत एव दृष्टमस्ति किंच गृहागतं शरणागतं बालं वृद्धं नश्यन्तं रोगार्त्तं च सत्पुरुषा न घ्नन्ति तन्निशम्य धवलोखड्गममुञ्चत्कुमाराय च सार्द्धे द्वे शते सवस्तूनि यानपात्राणि ददौ संग्रामकाले च पलायितानां नृपे बद्धे च पश्चादागतानां स्वदशसहस्रसुभटानां जीविकां बभंज तदा श्रीपालेन समाश्वास्य ते सुभटाः स्वभागागतपोतरक्षणार्थं स्थापिता महाकालनृपं च बन्धनमुक्तं कृत्वा पलायितांश्च नृपसेवकान्समाकार्य स्वभागागतपोतस्थवस्त्रालंकारादिभिः सपरिवारं नृपं सत्कृत्य पोतकरदा-नपूर्वकं विससर्ज तदा कुमारस्य निरुपमसौजन्येनाऽतुल्यपराक्रमेण निर्जितराज्यग्रहणनिर्लोभत्वेन

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

चातीव चमत्कृतो भूपतिस्तादृशसत्पुरुषस्य भक्तिकरणाभिलाषेणाऽवोचद्धे सत्पुरुष कृपां विधाय त्वत्स-
मागमनेनाऽस्मदीयं नगरं पावनं कुरु मरुदेशे कल्पपादपकुसुमसुगंधवत्त्वादृशसत्पुरुषदर्शनमस्मादृशां
दुर्लभमेवाऽतः सपरिवारस्त्वरितं समागच्छ तदा धवलः प्राह हे कुमार शत्रुगृहे सर्वथा न गन्तव्यं कुमारःप्राहा-
धुनाऽयं महाकालनरेन्द्रः शत्रुर्नास्ति किन्तु मित्रमस्ति तदा धवलः प्राह त्वादृशानां पुण्यवतां यत्र त-
त्राऽपि सत्कारो भवेदेव किन्त्वत्र बहुकालो व्यतीतो रत्नद्वीपश्च बहुदूरेऽस्ति त्वां विना चाहं कथं गच्छेयं
तत्रतु शीघ्रं गन्तव्यमस्ति कुमार उवाच तथापि नरेन्द्रविज्ञप्तिं त्यक्तुं न शक्नोमीति प्रोच्य सपरिवारः
कुमारो नगरंप्रति चचाल पृथ्वीपादेशेन तस्मिन् नगरे प्रतिगृहं तोरणानि बद्धानि प्रतिमार्गं कचवरदूरी-
करणपूर्वकं जलसिंचनपुष्पविकिरणादिशोभाविधिःकृतःप्रतिचत्वरं विविधवाद्यसंगीतयुतं नृत्यं प्रवृत्तमेवं-
विधे नगरे महोत्सवपूर्वकं नृपेण कुमारःप्रवेशितो मार्गे वर्यवस्त्राभूषणशोभितदेहैः पौरैः साश्चर्यं दृश्यमाणो
विविधाश्चर्याणि पश्यन्सर्वलोकप्रणतः कुमारः पृथ्वीपप्रासादं प्रविवेश तत्र भूपः सन्मानासनस्नानवर्य-
वस्त्रालंकारविविधभोजनादिभिस्तं सत्कार्य सभां नीत्वा स्वर्वसिंहासने चोपवेश्य स्वहस्तौ योजयित्वाऽवोच-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्सत्पुरुषेद्रंराज्यं त्वया निर्जितमस्ति तस्मात्त्वं गृहाण मत्प्राणास्त्वदायत्ताः सन्ति कुमारेण तन्न स्वीकृतं तदा-भूपः प्राह मम प्राणतोऽपि प्रिया मदनसेनाभिधा पुत्री विद्यते प्रसादं कृत्वा तां स्वीकुरु कुमारः प्राह हे नरेन्द्र वैदेशिकाज्ञातकुलशीलाय मह्यं स्वपुत्रीदानमयुक्तमतः सम्यग् विचारं कुरु भूमीपोऽवदद् मया-ऽऽचारादिनैव तव कुलं ज्ञातमतो मदीय प्रार्थनाभंगं मा कुरु तदा नृपाग्रहेण कुमारेण तत्स्वीकृतं नृपेण विविधभोजनवस्त्रालंकारदानसन्मानवाद्यनृत्यधवलगीतादियुतं महामहं कृत्वा रूपाधरीकृतरतिगुणसैन्य-वती स्वपुत्री मदनसेना श्रीपालेन सह परिणायिता। करमोचनावसरे पृथ्वीपेन बहुप्रवरमणिमुक्ता-फलालंकारांशुकदासदासीयुतं सप्तभूमिकं महत्पोतरत्नं प्रवरपात्रवन्ति च नव नाटकानि प्रदत्तानि श्रीपाल-परिवारश्च प्रवरभोजनवस्त्रालंकारादिभिः सत्कृतस्ततो गमनावसरे स्वपुत्र्यै पृथ्वीपराज्ञीभ्यां योग्या शिक्षा दत्ता नृपेण प्रवहणरत्नं सागरोपकंठं प्रापितं ततः श्रीपालो मदनसेनया सह सपरिवारः सपरिवारनृपेण सह जलधितटंसमागतस्तदातस्य नृपदत्तप्रवहणादिसमृद्धिं वीक्ष्य धवलोऽचिन्तयद्धा किमदं जातं यो मदीय-दाससदृश एकाक्येव मया सह समागतःस समृद्धया मत्तोऽप्यधिकः संजातो वारिनिधियात्राऽस्यैव



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सफला जाता मया तु वृथाश्रम एव कृतोऽहं तु जलेन्धनार्थमत्र समागत्य केवलं दुःखेन वृतोऽयं तु मदीया-र्द्धसमृद्ध्या भूपस्य समृद्ध्या पुत्र्या च वृत ऋद्ध्या बलेन चाभ्यधिकोऽयं मम भाटकमपि न दास्यत्यथ किं करोमीत्यादि चिन्तापरश्रेष्टिभावं विज्ञाय श्रीपालस्तूर्णं तत्र समागत्य श्रेष्ठिने दशगुणं भाटकमदादहो सत्पुरुषाः संप-तावपि विवेकविकला न भवन्ति। यदुक्तं—विवेकः सह संप-त्या, विनयो विद्यया सह। प्रभुत्वं प्रणयोपेतं, चिह्नमेतन्महात्मनाम् ॥१॥ दुर्जनस्य चाऽयंस्वभाव एव यदन्यस्य समृद्धिं दृष्टुं प्रशंसां च श्रोतुं न शक्नोति हृदये च ज्वलति। अथ महाकालनृपः सपरिवारं श्रीपालं प्रवहणेषु समुपवेश्य स्वपुत्र्यै च शिक्षां दत्वा सपरिवारः स्वनगरं समागात् पोताश्चरत्नद्वीपं प्रति चालिताः क्रमेण लोकाः प्रवहणैः समुद्रं तीर्त्वा मुमुक्षवश्चारित्रपोतेन मोक्षमिव रत्नद्वीपं प्राप्ताः सर्वेऽपि जनाःपोतेभ्यः समु-तीर्य सर्वाणि पोतस्थक्र-याणकानि चोत्तार्य समुद्रोपकंठे वस्त्रमंडपानि रचयित्वा तेषु क्रयाणकानि स्थापयित्वा सुखेन वस्त्रमंडपेषु तस्थुः श्रीपालोऽपि विविधवर्णवर्यवस्त्रविनिर्मितमंडपे स्वर्णपर्यंके मदनसेनया सहोपविश्य विविधनाटकानि पश्यन्वि-मानस्थितदेववदशोभत। तदा धवलश्रेष्ठी तत्रागत्य श्रीपालमवोचद्धकुमार त्वया प्रवहणस्थक्रयाणकानि



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कस्मान्न विक्रीयन्तेऽत्रैतेषां सुबहुमूल्यं लभ्यते तदा श्रीपालोऽवदत् श्रेष्ठिन्मम त्वया सह किमप्यन्तरं नाऽस्ति तस्मात्त्वमेवास्मद्वस्तुनां विक्रयं कुर्वंत्रत्यान्यक्रयाणकानां च क्रयं कुरु तन्निशम्य धवलो मार्जारो दुग्धं प्राप्येवातीव संतुष्टः संस्तद्वचनं प्रमाणीकृत्याथाहमस्य वस्तूनां यथेच्छं लाभं स्वयं गृहीस्यामि सुखमग्नोऽयं तद्विषये किमपि न जानातीति चिन्तयन् स्वस्थानमगात्। इतश्च वर्यरूपवेशः प्रसन्नवदननयनः सुरकुमार-सदृशो वर्याश्वरत्नवाहनः सारपरिवारपरिवृतः कश्चित्पुरुषस्तत्र समागतो ज्ञातवृत्तान्तेन कुमारेण स स्वपार्श्वे समाकारितः सोऽपि समागत्य कृतप्रणामः कुमारनिर्दिष्टासने समुपविष्टः सुरनाटकसदृशं च नाटकं कुमार-रूपवेशाचारादिकं च वीक्ष्य हृदि चमत्कृतः सन्नेवमचिन्तयन्नायं सामान्यपुरुषः किन्त्वनेनाचारेण कोऽपि नरेन्द्रपुत्रो भविष्यति। यदुक्तं—आचारः कुलमाख्याति, वपुराख्याति भोजनम्। संभ्रमः स्नेहमाख्याति, देशमाख्याति भाषितम् ॥१॥ तावन्नाटके पुर्णे संजाते श्रीपालोऽपृच्छद् भो भद्र त्वत्कुलस्थाननामादिना सह कमपि दृष्टमाश्चर्यं कथय तदा स प्राह हे स्वामिन्नस्मिन्द्वीपे वलयाकृति बहुबृहच्छिखरो रत्नसानुनाम पर्वतोऽस्ति तन्मध्ये देवनगरी सदृशा रत्नसंचयाभिधा विद्याधरकृतवासा नगर्यस्ति तत्र कनककेतुनामा



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विद्याधरनृपो राज्यं करोति तस्य रत्नमालाभिधपत्नीकुक्षितश्चतुर्णां पुत्राणामुपर्येकाऽद्भुतरूपधरा मदनमंजुषाभिधा पुत्री संजाता क्रमेण सर्वकलानिपुणा ज्ञातसर्वज्ञोक्ततत्त्वा सा यौवनं प्राप्ता। तस्यां पुर्यामेको ज्ञाततत्त्वो जिनधर्मसेवनपरो जिनदेवाभिधः श्रावकोऽस्ति तस्य जिनदासाऽभिधोऽहं पुत्रोऽस्मि। अथाऽहमेकमाश्चर्यं ब्रवीमि तत्सावधानीभूय श्रुणु—रत्नसानुगिरिशृंगे कनककेतुपृथ्वीपपितामहकारितः प्रोत्तुंगो विविधरत्नमंडितस्वर्णस्तंभशिखरशोभितोऽतिविशालः श्रीऋषभजिनप्रासादोऽस्ति तत्र सुवर्णमणिमया श्रीऋषभप्रभोः सकलजीवानंददायिनी प्रतिमाऽस्ति तस्याः प्रत्यहं तन्नगरीवास्तव्याः सपृथ्वीपा लोकाः सनमस्कारं ध्यानं पूजनं च कुर्वन्ति। भूपपुत्री मदनमंजुषा त्रिसंध्यं विशेषेण भक्तिपराऽगरचनादिना पूजनं करोति। अथैकदा भक्तिमतीसा राजसुता श्रीजिनप्रतिमाया अतीवाद्भुतां वर्यतमामंगरचनां कृत्वा तामेव पश्यन्ती प्रवर्द्धमानभक्तिभावा तत्रैव स्थिताऽस्ति तावत्तत्र प्रासादे भूपतिः समागतो जिनेश्वरं प्रणम्य स्वांगजा कृतामद्भुतामंगरचनां च विलोक्य तस्या नैपुण्येन जिनभक्त्या चातीवसंतुष्ट एवमचिन्तयदहोऽस्याः कौशल्यमनयाऽद्यापूर्वांगरचनां कृत्वा स्वभक्तिकौशल्ये च दर्शिते

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

धन्यैषा कृतसुकृत्यैषा या स्वकुशलत्वं जिनेन्द्रभक्तौ व्यापारयत्यत एतादृश्या जिनभक्तिपरायाः सुशीलाया मदीयपुत्र्या यदि तत्तुल्यः पतिर्मिलिष्यति तर्हि मम मत्पुत्र्याश्च सुखं भविष्यतीत्यादि चिन्तयन्स क्षणं ध्यानलीनयोगीव शुन्यचित्तस्तस्थौ तदा विधत्तनमस्कारा पश्चात्क्रमणं कुर्वन्ती सा पृथ्वीपसुता जिनगर्भगृहान्निःसृत्य रंगमंडपं समागता तस्मिन्नवसरे जिनगर्भगृहकपाटयुगलमकस्माद्बृहच्छब्दं विदधानं तथा मिलितं यथा भूपादीनां महाप्रयत्नेनाऽपि नोन्मीलितं तदा भूपसुता जिनदर्शनान्तराया त्स्वहृदयेऽतीवसंतापिता स्वात्मानं निनिन्द हा प्रमादवशेनाऽधन्यया पापिन्या मया कापि जिनवरस्य महत्याशातना विधत्ताऽन्यथा कथंमत्कृतांगरचनायुतजिनदर्शनस्य ममाऽन्तरायो भवेद्धा कृतपापामविवेकिनीं मन्दभाग्यां मां धिगस्तु धिगस्तु ययाऽन्येषामपि जिनदर्शनांतरायःकृतो हे स्वामिन्मामकमेकमपराधं क्षमस्व हे दयासमुद्र भाग्यहीनायै मह्यं दर्शनं देह्येवं वदन्तीं रुदन्तीं च तां वीक्ष्य संजातसंतापो भूपोऽवोचद्धे पुत्रि त्वं शोकं मा कुरु तव दोषो नास्ति किन्तु ममैवात्र दोषोऽस्ति मया जिनप्रासादे त्वत्कृतां जिनांगरचनां निरीक्ष्य शून्यभावेन त्वद्वरचिंता स्नेहात्कृता तस्माज्जिनप्रासादेऽन्यचिन्तनफलं



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मया प्राप्तं यद्यपि श्रीजिनेश्वरा वीतरागत्वात्कोपं न कुर्वन्ति तथापि तदधिष्ठायकदेवेन मह्यं शिक्षा दत्तेति ज्ञायतेऽतोऽहं जिनप्रासादकपाटोद्घटनवृत्तान्तमज्ञात्वा स्वप्रासादं नैव यास्यामि वार्यन्नं च नैव गृहीष्यामीति निश्चयं कृत्वा स्तोकपरिवारः स्वपुत्र्या सह पृथ्वीपो निर्मलमनाः स्थिरशरीरस्तत्र स्थितस्तस्य त्रय उपवासाःसंजातास्तत्र बहुलोका संमीलिताः परस्परं च केचित्पृथ्वीपस्य केचिच्च तत्पुत्र्या दोषान्प्रवदन्ति यतोऽपरमार्थज्ञा लोका यत्तत्प्रलपन्त्येवाथ तृतीयनिशापाश्चात्यप्रहरे सहसैवंविधाऽऽकाशे वाणी संजाता—भूपपुत्र्या न दोषोऽस्ति, न दोषोऽस्ति नृपस्य च। चैत्यद्वारपिधानस्य, पौराः श्रुणुत कारणम्॥१॥ उद्घाटो चैत्य द्वारस्य, यस्य दृष्ट्या भविष्यति। भूपपुत्र्याः पतिर्भावी, स नरः पुरुषोत्तमः॥२॥ अहं चक्रेश्वरी देवी, नाभेयजिनकिंकरी। मासमध्ये वरं त्वस्यास्या, आनयिष्यामि निश्चितम्॥३॥ तां वाणीं श्रुत्वा सपुत्रीपौरो भूपोऽतीवहर्षितः स्वप्रासादं च गत्वा गृहचैत्यप्रतिमां पूजयित्वास्वपुत्र्यासह पारणंचकार चक्रेश्वरीवाणीं च समग्रपुरे प्रससार ततो बहवो लोका नृपपुत्रीपरिणयनेच्छया जिनमंदिरस्य मीलितकपाटयुगलसमीपं गच्छन्ति तन्निरीक्षणेन कपाटोद्घाटनं न भवति किन्तु तेषां कर्मोद्घाटनं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भवति तेषां तत्र गमनं सप्रमोदं भवति परं ततः पश्चादागमनं सविषादं भवति । एवं तस्या देवीवाण्या अद्य किंचिदूनोमासः संजातः परमद्यापि तच्चैत्यद्वारं तथैव निमीलितमस्ति पौराः प्रतीक्षमाणा अनेकान्विकल्पान् कुर्वन्ति। हे देवैतद् महाश्चर्यं मया दृष्टं तव पार्श्वे च कथितं। अद्य द्वीपान्तरात्पोताआगताः सन्तीति श्रुत्वाऽहमत्र समायातो युष्मद्दर्शनं चात्रसंजातं ततोऽहमेवंमन्ये ययूयमेव देव्याऽत्र समानीता. यदा च युष्माभिश्चैत्यद्वारोद्घाटनं भविष्यति तदा तु सनृपाः सर्वेऽपि पौरा अतीवानन्दिता भविष्यन्त्यत्यानंदपूर्णाया राजपुत्र्याश्च भाग्यप्रशंसां करिष्यन्ति। तस्माद्यूयं तूर्णं श्रीऋषभदेवदर्शनार्थं तत्र चलत तन्निशम्य श्रीपालोऽश्वरत्नारूढः श्रेष्ठीसमीपं समागत्याऽवोचद्धे श्रेष्ठिन्देवदर्शनार्थं चल तदा धवलःप्राह हे कुमार त्वया प्रयासेन विना यथेष्टं धनं लभ्यते तस्मात्त्वं निःकार्यो निश्चिन्तश्चाऽसि। वयं तु तथा कार्याकुलाःस्मो यथाऽस्माभिस्त्रिकालभोजनमपि सकृदेव क्रियते तस्मात्त्वं यथेच्छं गच्छ तच्छ्रुत्वा सपरिवारः संजातशुभशकुनः कुमारो जिनदासश्राद्धेन सह जिनप्रासादसमीपं समागत्याऽवोचद्धो जना यूयं सर्वेऽपि पृथक् पृथक् चैत्यसंमीलितद्वारपार्श्वे व्रजत येन द्वारोद्घाटकस्य सम्यग्निर्णयो भवेत् । अहो सज्जनानां स्वभावोऽहोते-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

षामचला स्वपूर्वकृतकर्मश्रद्धाऽहो तेषां विवेकवती निर्लोभान्धता नोचेदेतादृशे कार्येऽन्येभ्यःकथं प्रथमावसरो दीयेत। श्रीपालोक्तं श्रुत्वा परिवारलोका अवदन् हे स्वामिन्नेवं मा वद यतो यथा भास्करमृगलांच्छनौ विना कमलकुमुदवने विकस्वरे कर्तुं- कोऽपि न शक्नोति तथा त्वां विनाऽन्येन द्वारोद्घाटनं न भविष्यति तस्मा-त्त्वमेव द्वारोद्घाटनं कृत्वा सर्वान्सानन्दान् कुरु। अहो तादृक्सज्जनसंगत्या समीपवर्तिनोऽपि सविवेकाः संजायन्ते। तच्छ्रुत्वा श्रीपालो हयादवरुह्य कृतस्नानः पूजायोग्यवस्त्राणि परिधाय विकसितवदननयन-वारिजो रंगमंडपं समागच्छन् जिनगर्भगृहद्वारमपश्यत्तस्मिन्नेव समये महाशब्दं कुर्वन् तत्कपाटयुगलं सूर्य-दर्शनात्कमलवदुन्मीलितं तदा दैवी पुष्पवृष्टिःसंजाता जय जयेति शब्दःप्रवृत्तः सेवकैश्च नृपाय वर्द्धापनिका दत्ता तद्वृत्तान्तं श्रुत्वाऽतीव हर्षितो दत्तभूरिदानो भूपः सपरिवारस्तत्र समागत्य कुमारमपश्यत्तदा श्रीपालः प्रागेव देवतापूजितमम्लानकुसुममालं जिनेश्वरं वर्यचंदनकर्पूरकुसुमादिद्रव्यै संपूज्यैवंविधांस्तुतिंकुर्वन्नस्ति—भव्यवार्जविकासार्क, करुणावारिधे प्रभो। सुरेन्द्रार्चितपद्वाब्ज, देवाधिदेव ते नमः ॥१॥ नाथ त्वद्-दर्शनेनाऽद्य, गतानि प्राकृतानि मे। पापानि विलयं स्वामिन्; फलितं जीवितं तथा ॥२॥ फलिते चक्षुषी



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

क्रिया, सफला समजायत। अतुल्यमहिमांऽभोधे, तारय मां भवोदधेः॥३॥ इत्यादि कुमारकृतांस्तुतिं निशम्य पुत्र्यासह भूपोऽत्यर्थंहर्षित श्रीपालोऽपि पूजाविधिं समाप्य बहिर्मंडपं समागत्य पृथ्वीपं हस्तवंदनेन वन्दित्वा नृपदार्शितेयोग्यस्थाने समुपविष्टस्तदा नृपेणप्रोक्तं भो भद्र यथा त्वया चैत्यद्वारोद्घाटनं कृत्वाऽस्मभ्यमानन्दो दत्तस्तथा तव चरितकथनेनाऽपि देहि तन्निशम्य यावत्कुमार एवं चिन्तयति चेदुत्तमाः स्वमुखेन स्वाभिधानगृहणेऽप्यलसा भवन्ति तर्हि स्वमुखेनाऽहं स्वचरितं कथं कथयेयं तावत्तत्रोद्योताश्चर्यान्सर्वैरूर्द्धमुखै र्दृष्टो देवपरिवृत एकश्चारणमुनिरागतो जिनवरं वन्दित्वा सुररचितासने च समुपविष्टः। पृथ्वीपालादिभिः साश्चर्यं सहर्षं विधिना च वन्दितस्ततो वाचंयमेन धर्मोपदेशः प्रारब्धः—

भव्या दुर्लभमानुष्यं, प्राप्य धर्मं जिनोदितं। कुरुध्वं जन्मरोगाधि—जरामृत्यादिदुःखहम् ॥१॥
सार्वधर्मस्य सारं च, सिद्धचक्रस्य सेवनम्। तत्त्वत्रयस्वरूपस्य, सिद्धस्य नवभिः पदैः ॥२॥
येन देवनरेन्द्राणां, भवे भवे पदे पदे। संपत्प्रान्ते च मोक्षःश्री—श्रीपाल इव लभ्यते ॥३॥
निशम्य तन्नृपोऽवोचत्, श्रीपालः कोऽभवत्प्रभो। संपत्तेन कथं प्राप्ता, संसेव्य सिद्धचक्रकम् ॥४॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हस्तेन दर्शयित्वातं, विज्ञप्त्या पृथ्वीपस्य च । द्वारोद्घाटनपर्यन्तं, प्राहं तच्चरितं मुनिः ॥५॥
पुनः प्राह मुनि भूप, बहुभूपसुतापतिः । भूत्वाऽयं पितृराज्यस्थो, भावी भूपेन्द्रभूपकः ॥६॥
प्रभावं जैनधर्मस्य, प्रव-र्त्य भूतलेऽखिले । प्रान्ते श्रीसिद्धचक्रस्य, ध्यानलीनः पवित्रधीः ॥७॥
मृत्वाऽयं नवमे स्वर्गे, देवो भूत्वा च म-र्त्यकः । पुनर्देवःपु नर्म-र्त्यो, विधायैवं भवाष्टकम् ॥८॥
भवे च नवमे भूत्वा, मनुष्यो भावी मुक्तकः । श्रीपालो गतसंसारः, प्रोच्येति मुनिराङ्गतः ॥९॥
मुनेस्तच्चरितं श्रुत्वा, प्रभूतानंदितो नृपः । सर्वपौरसमक्षं स्वां, कमाराय ददौ सुताम् ॥१०॥
प्रभूतदान सन्मान—विविधोत्सवपूर्वकं । कुमारेण सह पुत्र्या, विवाहं चाकरोन्मुदा ॥११॥
हस्तमोचनकाले च, कुमाराय ददौ नृपः । प्रभूतस्वर्णरत्नादि—प-त्यश्वद्वीपस्यन्दनम् ॥१२॥
विविधैर्वस्तुभिःपूर्णं, दासदासीयुतंवरम् । प्रासादं च कुमाराय, वासाय नृपति र्ददौ ॥१३॥
पत्नीद्वययुतो तत्र, देववल्लीलया स्थितः । कुमारो धर्मकार्यं च, दानं कुर्वन् दिने दिने ॥१४॥
पूजाप्रभावनाद्येषु, प्रत्यहं सफलां श्रियम् । तस्मिन्कुर्वति चैत्रस्य, चाष्टमी धवलाऽऽगता ॥१५॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पूर्ववत्सिद्धचक्रस्याऽऽ—राधनं सोऽकरोन्मुदा । साधर्मिकाणांवात्सल्यं, कृत्वा तस्थौ स पूर्व वत् ॥१६॥

अथान्यदा श्रीपालेन सह जिनप्रासादेसमुपविष्टःपृथ्वीपः सनृत्यवाद्यां महापूजां कारयति तदा तत्र दंड-पाशिकः समागत्य नृपं च प्रणम्याऽवोचद्धे नाथ प्रवहणेषु समागतेनैकेन दुष्टवणिजा करभंगेण सह तवाज्ञाऽपि खंडिताऽस्मभ्यं स्वकीयं बलमपि दर्शितं तदाऽस्माभि र्दृढबन्धनैः स बद्धोऽत्र चानीतोऽथ यथा देशं कुर्वीमहि तच्छ्रुत्वा पृथ्वीपःप्राह यद्यनेनाज्ञाभंगः कृतस्तर्ह्यस्य प्राणानपहरत तन्निशम्य श्रीपालःप्राह हे भूपते जिन-प्रासादस्थितस्त्वमेतादृशं जीववधादेशंमा देहि यतोऽत्र सावद्यकथनेऽपि महादोषःकथितोऽन्यच्चाऽपराधि-नमदृष्ट्वा सम्यक् परीक्षणं चाऽकृत्वा दंडो न देयो यतः सर्वे सदृशा न भवन्ति । तत्कुमारवचनं सत्यं मत्वा भूमीपेन स स्वपार्श्वे समानायितो । यतःकस्याऽपि सत्यवचनं श्रुत्वा सज्जनाः स्वाऽसत्यकथनाग्रहिणः सक्रोधाश्च न भवन्ति किन्तु सानंदाःप्रसन्नवदनाः सन्तस्तूर्णमसत्यत्यागपूर्वकं स्वीकुर्वन्ति । दुर्गपाल-समानीतं तं समुपलक्ष्य कुमारःप्राह प्रजापालाऽयमपराधी तु सुन्दरः समानायितोऽयं तु येन सहाऽहं समागतःस कोट्याधिपतिर्मुख्यो मम जनकतुल्योऽस्ति तन्निशम्य तूर्णं कृतबन्धनमुक्तःस धवलोऽपराधक्ष-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मापूर्वकं भूपेन स्वपार्श्वं समुपवेशितः कुमारवचनेन च सत्कृतस्ततः श्रीपालो लोभस्य सर्वगुणनाशकत्वं सर्वपापमूलत्वं च विचिन्त्य सब्दोधदानपूर्वकं नृपाय करं दापयित्वा श्रेष्ठिनं ससन्मानं विससर्ज। अथान्यवासरे कुमारसमीपं समागत्य धवलेन प्रोक्तं भो कुमार यथाक्षेमेण त्वया वयमत्राऽऽनीता स्तथाऽस्मान्स्वदेशं प्रापयाऽथ विलंबं माकुरु सर्वे पोता अत्रत्यक्रयाणकै र्भृत्वा प्रयाणायसज्जिताः सन्ति। तन्निशम्य कुमारेण स्वदेशं प्रति प्रयाणार्थं नृपो विज्ञप्तस्तदा तादृशस्य जामातुः प्राणप्रियायाश्च स्वपुत्र्या विरहसहनासमर्थेनाऽपि निरुपायेण भूपेन सदुःखं तदनुमतं स्वपुत्र्यै च श्वशुरगृहवासयोग्या शिक्षा दत्ता। अथ श्रीपालः स्वपत्नीद्वययुतः सपरिवारः पृथ्वीपकृतप्रयाणसन्मानपूर्वकं सपरिवारेण नृपेण सह वारिधितीरं समागत्य सपत्नीपरिवारः स्वमुख्यप्रवहणे प्रविष्टः सपरिवारः क्षमापतिश्च सदुःखं स्वनगरं समागतः। अथ निर्मलचित्तेन कुमारेण सस्नेहं ससारपरिवारो धवलः स्वपोते समुपवेशितः शेषजनाश्चाऽन्यतरंडेषु प्रेषितास्ततः श्रीपालधवलादेशेन नाविकै श्चालितास्तरंडाः समुद्रमध्ये त्वरितं चलन्तिस्म। अथ धवलः श्रीपालसमृद्धिविस्तारं वीक्ष्य हृदि ज्वलन्नेवमचिन्तयदहहाऽयमेकाकी मया सह समागत आसीत्परमनेन कीदृशी समृद्धि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

लब्धाऽनेन मत्तः सार्द्धं प्रवहणशतद्वयं विनाप्रयासेन वृथैव गृहीतं तथैव पृथ्वीपद्वयात्कन्यारत्नद्वयमीदृक् समृद्धिविस्तारं च गृहीतमहोऽयं मत्तो महार्द्धिकः संजातो यदि कथमप्यस्याऽद्भुतरूपपत्नीद्वययुता समृद्धिर्मदीया संजायेत तदैव मम निर्वृत्तिर्भविताऽन्यथा न। परमस्य सभार्याद्वया समृद्धिःकेनोपायेन लभ्येत तन्निर्णयकरणासमर्थःस सदैव हृदि चिन्ताग्निना ज्वलन् क्वाऽपि रतिं न प्राप्तः। तस्य क्षुधापिपासेऽपि विनाशं प्राप्ते। निद्रासुखेनाऽपि स त्यक्तः शरीरेणाऽपि स दुर्बलः संजातः एवंविधः कृतघ्नमुख्यो दुर्जनस्वभावो लोभकामपिशाचग्रस्तःस एवमचिन्तयद् यावदयं कुमारो जीवन्नस्ति तावत्कथमपि मम कार्यसिद्धिर्न भविष्यत्यत एनं कथमपि यमगृहं प्रापयामीतिदुर्ध्यानपरःस निशि निद्रासुखविहीनः शयनीये स्तोकजले मत्सीव पतितः सन्दुःखमनुभवति। अहो दुर्जनस्यैतत्सर्वं स्वभावसिद्धमेव यदुक्तं—अकरुणत्वमकारणविग्रहः, परधने परयोषिति च स्पृहा। सुजनबन्धुजनेष्वसहिष्णुता, प्रकृतिसिद्धमिदंहि दुरात्मनाम् ॥१॥ अथवा तादृशा लोभग्रहग्रस्ता अकर्तव्यं कुर्वन्त्येव—यदुक्तम्—जीवान्निहन्ति विविधं वितथं ब्रवीति, स्तेयं तनोति भजते वनितां परस्य। गृह्णाति दुःखजननं धनमुग्रदोषं, लोभग्रहस्य

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

वशवर्तितया मनुष्यः ॥२॥ सर्वेषामपि पापानां, निमित्तं लोभ एवहि। चातुर्गतिकसंसारे, भूयो भ्रम-
निबन्धनं ॥३॥ आकरः सर्व दोषाणां, गुणग्रसनराक्षसः। कन्दो व्यसन वल्लीनां लोभः सर्वार्थबाधकः ॥४॥
सर्पोऽनिष्टोऽथवा लोभो, द्वयोर्लोभस्त्वनिष्टकः। दशेच्च मर्दितः सर्पो, लोभो दशति सर्वदा ॥५॥ अथ शय-
नीये सदुःखं लुठन्तं तं तदैव तत्रागतानि तस्य चत्वारि मित्राणि तथावस्थं वीक्ष्य प्रोचुर्भो मित्र किं
त्वदीयशरीरे कोऽपि रोगः समुत्पन्नोऽस्ति येन विनिद्रः सन्नेवमालोठसि दुर्बलश्च संजातोऽसि स्फुटं वद
यथारोगप्रतिकारःक्रियते तन्निशम्य कथनं विना च मम कार्यसिद्धिर्न भविष्यतीति विचिन्त्य लज्जां मुक्त्वा
सोऽन्तर्मलीनो धवलः सर्वमपि स्वचिन्तितमकथनीयमकर्तव्यमकथयद्। यतो यावल्लज्जा भवति तावत्सा-
जननीवत्पापेभ्यो रक्षत्यन्यथा तृष्णाप्रेरितो जीवोऽकर्तव्यकथनाचरणादिकं करोत्येव यदुक्तम्

अकर्तव्येष्व साध्वीव, तृष्णा प्रेरयते जनम्। तमेव सर्वपापेभ्यो, लज्जामातेव रक्षति ॥१॥

धवलोक्तं श्रुत्वा सज्जनस्वभावैर्मित्रैः प्रोक्तं धिगस्तु त्वां त्वया क्रिमेतदत्ययुक्तंकर्णतप्तत्रपुतुल्यं
प्रोक्तमन्यस्य कस्याऽपि वित्तपत्नीप्राणहरणं यदि महादुःखकारणमतीवायुक्तं च शास्त्रे प्रोक्तमस्ति तर्ह्येता



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दृशस्य पुरुषोत्तमस्य स्वोपकारिणः सज्जन स्वभावस्य स्वामिनो वित्तपत्नीप्राणहरणमतिशयेनाऽयुक्तमिह भयंकरदुःखापयशःप्रदं परत्रचाऽतिदुःसहनरकादिदुःखप्रदं भवत्येव भो दुर्जनवत्त्वयैतादृशमनार्यं कर्तव्यं कथं चिन्तितं यदि कथमपि तच्चित्ते समागतं तर्ह्यस्माकमग्रे कस्मात्कथितं त्वमद्य यावदस्माकं मित्रमभूत्परमद्यानेनात्यनार्येण स्वोपकारिपुरुषोत्तमद्रोहकारिचिन्तनेनास्माकं शत्रुः संजातो भोनिर्लज्ज दुष्टहृदय तव किं तद्विस्मृतं यदनेन पुरुषोत्तमेन तव स्तंभिताः पोताश्चालिता महाकालनृपात्त्वं जीवन्मोचितः समृद्धिश्च पश्चाद् दापिता रत्नद्वीपे कनककेतुनृपाच्च जीवन्मोचितः समृद्धिश्च दापिता। एवं विधोपकारिणोऽपि द्रोहकरणलालसस्त्वमतिशयेन दुर्जनोऽसि। यतः दुर्जना एवं विधा एव सन्ति यदुक्तम्—

उपकृतिरेवखलानां, दोषस्य महीयसो भवति हेतुः। अनुकूलाचरणेन हि, कुप्यन्ते व्याधयोऽत्यर्थं ॥१॥

सद्भिः संसेव्यमानोऽपि, शान्तवाक्यैर्जलैरिव। प्लुष्टपाषाणवद् दुष्टस्तापमेवाभिमुंचति ॥२॥

अण्वपि गुणाय गुणिनां, महदपि दोषाय दोषिणां सुकृतम्। तृणमपि दुग्धाय गवां, दुग्धमपि विषाय सर्पाणाम् ॥३॥ उपकारिण्यपि सुजने, स्निग्धेऽपि खलास्त्यजन्ति न प्रकृतिं। ज्वलति जलैरपि सिन्धोरंके

P. P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निहितोऽपि वडवाग्निः ॥४॥ भोदुर्जनमुख्य तव दुर्जनस्वभावं त्यजाऽनेन स्वपुण्येनैवेतादृशी समृद्धिः प्राप्ता त्वं कस्मादस्मिन्द्वेषं वहस्यस्मिन्पुरुषोत्तमे परमोपकारिणि पुण्यशालिनि विपरीतं चिन्तयतस्तवैव विपरीतं भविष्यति तस्मात्त्वमस्मादकार्याद्विरमेत्यादिहितशिक्षां दत्त्वा । तस्यत्रयः सुहृदोऽगच्छंस्तेषां सुशिक्षया धवलहृदये मनागपि सज्जनत्वं नायातं । अथ धवलदुष्टकार्ये साहाय्यकरणार्थं तत्रस्थितः पापमतिश्चतुर्थः सुहृत्प्राह भोमित्र त्वयेतादृशो मन्त्रो मित्रमिषेण तव शत्रुभूतानामेषामग्रे न प्रोच्योऽहमेवैकस्तव हितचिन्तकः सुहृदस्मि परमेते शत्रव एव । अथाहं तवाऽभीष्टसाधकोऽस्मि त्वं चिन्तां त्यज श्रीपालेन सह विशेषेण मैत्रीं कुरु यथा सोऽतीवविश्वासवान्सन्सुखवर्त्ती भवेत् तच्छ्रुत्वा धवलः प्राह भो मित्र त्वमेव मम कार्यकाले सहायकः श्रेष्ठः सुहृदसि परमेते शत्रव एव । अथ त्वं मदीयं कार्यं केनोपायेन साधयिस्यसि तत्कथय तदा सोऽतिदुष्टहृदयः सुहृत्प्राह त्वया प्रवहणस्य बहिर्मंचिकां बद्ध्वाऽतिविश्वस्तं श्रीपालं कुतुहलदर्शनार्थं तत्र समानीय स्वयं च ततस्तूर्णमवरुह्य मंचिकादवरकच्छेदनं मया सह कर्तव्यमेवंकृते श्रीपालः समुद्रे पतिष्यति तव मनोरथसिद्धिश्च भविष्यति तच्छ्रुत्वाऽतिहर्षितेन धवलेन

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

तस्मै धन्यवादं दत्त्वा श्रीपालेन सह मैत्रीं च विधाय विविधसन्मानवचनैर्निर्मलचित्तः श्रीपालोऽति विश्वस्तहृदयः कृतोऽथान्य दाऽतीवपापिष्ठचित्तेन तेन धवलेन दुष्टहृदयेन मित्रेण सह संकेतं कृत्वा निशि च मंचिकामारुह्य बारिधौ विविधमत्स्याऽऽश्चर्याणि पश्यतेव श्रीपालं प्रति प्रोक्तं भो कुमारेन्द्राऽद्य वार्द्धौ कमप्यपूर्वं दर्शनीयमाश्चर्यं दृश्यते यदि दर्शनेच्छा तर्हि तूर्णमत्रागत्य पश्य। तन्निशम्य कुमारः शीघ्रं मंचिकां समारुह्याऽधोमुखःसन् यावत्पश्यति तावदतिशयदुष्टहृदयो धवलस्ततोऽवरुह्य कुमित्रसहायो मंचिकादवरकान् चिच्छेद तदा श्रीसिद्धचक्रध्यानपरः श्रीपालः पाथोधौ पतन् जलोपरिस्थितमकरपृष्टे समुपविष्टः। श्रीसिद्धचक्रौषधीप्रभावेण च मकरपृष्टस्थितःस स्तोककालेन कुंकणदेशतीरं प्राप्तस्ततो मकरपृष्टतः समवतीर्य पयोधितीरवने चंपकपादपस्याऽधः सुष्वाप। अथ निद्रासुखमनुभूय यदा कुमारो जागरितस्तदा स्वं वर्यनेपथ्यधरसेवापरसुभटैःपरिवेष्टितमपश्यत्। ततस्ते सुभटाः कृतांजलयो विनयपराः श्रीपालमवोचन् भो पुरुषोत्तमाऽस्मिन्कुंकणदेशे प्रतिष्ठानपुरे वसुपालाऽभिधो नरेन्द्रोऽस्ति तेनाऽस्माकमेवमादेशोदत्तो भो सुभटा यूयं जलनिधितीरवनं गत्वा तत्राऽपरावर्त्तितच्छायस्य चंपकपादपस्याऽधः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सुप्तो यःकोऽपि पुरुषो भवेत्तमद्याऽपराह्णकालेऽश्वारूढं विधायाऽत्र समानयत तं पृथ्वीपादेशंश्रुत्वा वयमत्र समागता यथोक्तं त्वां चाऽपश्याम। अथ त्वं हयमारुह्याऽस्माभिः सह चल तन्निशम्य कुमारो वाजिनमारुह्य तैः सह चचाल ज्ञातवृत्तान्तः प्रजापतिः स्वपुरे महामहं प्रवर्त्य प्रवेशमहोत्सवयोग्यवर्यसामग्रीयुतः श्रीपालसन्मुखं समागत्य बहुसन्मानपूर्वकं तस्य महामहेन पुरप्रवेशं कारयित्वा वर्याशनवसनाभरणादिभिर्विविधां भक्तिं कृत्वा तं च राजसभायां सिंहासने समुपवेश्याऽवोचद्धे कुमारेन्द्र प्राक् सभास्थितेन मया तत्रागत एको नैमित्तिक इतिपृष्टो भो नैमित्तिक मदात्मजाया मदनमंजर्याः कःपतिर्भावी तदा नैमित्तिकः प्राह वैशाखधवलाष्टमीवासरेऽनपवर्तितछायस्य चंपकवृक्षस्याऽधो यो नरः सुप्तो भवेत्स त्वत्सुतापति र्ज्ञेयो। अथ नैमित्तिकवचनानुसारेण त्वमेवाऽस्माभिर्दृष्टस्ततस्त्वं मत्पुत्रीं परिणय श्रीपालेन तत्स्वीकृतं ततो धरापतिनाऽतीव विस्तरेण श्रीपालेन सह स्वकुमार्या विवाहः कारितःपाणिमोचनावसरे च भूपेन चतुरंगसैन्ययुतं बहुमणिरत्नमौक्तिककंचनादिकं दत्वाऽतिरम्यविशालप्रासादं निवासार्थं श्रीपालाय प्रदत्तं तत्र मदनमंजरीभार्यायुतः सुखान्यनुभवन्देववल्लीलया

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्थितोऽहो पुण्यलीलायितं. यं दुःखार्थं धवलो वारिधौ पातयामास तस्य तु सा विपत्संपद्रूपा संजाता यदुक्तं-वनेरणेशत्रुजलाग्निमध्ये, महार्णवे पर्वतमस्तके वा। सुप्तं प्रमत्तं विषमस्थितं वा, रक्षन्ति पुण्यानि पुरा-कृतानि ॥१॥ निपानमिवमंडूकाः, सरःपूर्णमिवांडजाः। शुभकर्माणमायान्ति, विवशाः सर्वसंपदः ॥२॥ अथ कुंकणाधीशेन राज्यार्थं दीयमानं ग्रामपुरादिकमस्वीकृत्य बुद्धिमता श्रीपालेन हीनजनोचितं तांबुल-दानकर्तव्यं प्रार्थितं तदा भूपेन तत्संतोषार्थं विशिष्टसत्कारयोग्यजनेभ्यस्ताम्बुलदापनार्थं तत्कर्तव्यं तस्मै समर्पितं ततः श्रीपालस्तत्कर्तव्यं कुर्वन् सुखेन कालं गमयति. इतश्च श्रीपालो यदा वारिधौ पतितस्तदा सकुमित्रो धवलो हृदयेऽत्यर्थं जहर्ष पोतलोकप्रत्ययकृते चोच्चैः शिरो वक्षश्च कुटयन् विलापान् कुर्वन्नेवम-वदद्धे स्वामिन् श्रीपाल मां मुक्त्वा त्वं कथं वारांनिधौ पतितो हे नाथ त्वां विना ममाऽऽपन्निवारणं कः करिष्यति निर्विघ्नं चाहं कथं स्वस्थानं गमिष्यामि हे सज्जनमुख्य प्रतिक्षणं मुखदर्शनेन विविधवार्तया चाऽऽनंददायिनं त्वां विना मह्यं क आनन्दं प्रदास्यति हा क्व गच्छामि किं करोमीत्यादींस्तस्य विलापान् श्रुत्वा प्रवहणेषु महान् कोलाहलः संजातः श्रीपालपत्न्यौ च तत्कर्णतप्तत्रपुसदृशमशनिपातनिभं प्राणप्रियस्य

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जलनिधौ पतनशब्दं निशम्य हाहाकारं कुर्वन्त्यौ मुक्तकंठमुच्चै र्विलपन्त्यावतीवदुःखतो वज्रताडित इव मुर्च्छितवत्यौ, ततः पाथोधिशीतलवायुना दासीकृतवारिव्यजनचन्दनाद्युपचारेण च गतमुर्च्छे ते पुनरेवं विलापांश्चक्रतु र्हा प्राणेश हा हृदयपते हा गुणसमुद्र हा शशिमुख हा वारिजनेत्र हा कामरूप जीवितेश्वर शरणविहीनेऽनाथेऽबले दीन आवां मुक्त्वा कथमेकाकी गतोऽसि हा नाथ निराधाराभ्यामावाभ्यां त्वां विना कः शरणं प्रदास्यति हा हृदयेश्वराऽऽवाभ्यां शीघ्रंदर्शनं देहि हा हते स्वः किं कुर्वः कुत्र यावो हा स्वामिन्नावां पयोनिधिमध्य एकाकिन्यौ प्रमुच्य कथं गत आवयोः पितृस्थानमपि दूरे संजातं हे हृदय हृदयेश्वरस्य समुद्रे पतनं निशम्याऽपि कथं शतधा न भवसि हे प्राणाः प्राणेशदुःखं श्रुत्वाऽपि कथं न यातेत्यादि विलापान्कुर्वत्योस्तयोः समीपं पापमतिर्धवलः समागत्य किंचिद्विलापादिकरणपूर्वकं शोकं प्रदर्श्य प्राह हे सुन्दर्यौ दैवाधीने कर्तव्ये केषांमपि बलं न चलति युवां शोकं मा कुरुतं युवयो र्वांच्छितपूरकोऽहं यावज्जीवन्नस्मि तावद्युवाभ्यां कस्मादपि भयं न सेवनीयमथ युवां श्रीपालसत्कं दुःखं विस्मृत्य प्राग्वत्सुखेन तिष्टतमहं युवयोःसकलवांच्छितानि पूरयिष्यामीति दुष्टचित्तस्य धवलस्य तद्विपरीतं वचनंश्रुत्वा विचक्षणाभ्यां

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ताभ्यां चिन्तितं निश्चितमनेनैव पापेनावयोः स्वामी पयोधौ पातितोऽस्त्यथाऽऽवाभ्यां रुदनं त्यक्त्वा स्वशील-रक्षणे यतितव्यं तदेवात्र समये युक्तमेवं यावत्ताभ्यां चिन्तितं तावत्तत्र वार्द्धावेवंविध उत्पातः संजातः कल्पान्तकालतुल्यवायवो वातुं लग्नाः, पाथोधिजलान्यतिशयेनोच्छलितुं लग्नानि, भयंकरं गर्जनं कुर्वतीभिरतिशयकृष्णघोरघनपंक्तिभिः क्षणेनाकाशमंडलं रुद्धं भयंकरतडिद्राक्षसीभि विजृंभितमतीवोच्छलच्चपलवारितरंगैः पोताः क्षणेनोपरि क्षणेन चाऽधो गमनं क्षणेन च परस्परास्फालनं चक्रुः पोतलोकाश्च महान्धकारे परस्परमपश्यन्तो महाक्षोभं प्राप्ताः सन्तो महादुःखकोलाहलपूर्वकं स्वं स्वमिष्टदेवमस्मरन् । तदा महाट्टट्टहासैः प्रवृत्तं स्तोककालेन च तत्र प्राग् डमडमशब्दं विदधानं डमरुं हस्ते धारयन्सखड्गोऽति-भयंकररूपधरः क्षेत्रपालः प्रकटीभूतस्ततो मानभद्रः पूर्णभद्रः कपिलः पिंगलकश्चेति चत्वारो वीरा अतिरुद्र-रूपधरा महामुद्गरकराः प्रकटीभूतास्ततः प्रचंडदंडकराः कुमुदांजनवामनपुष्पदन्तनामानश्चत्वारः प्रति-हाराः प्रादुर्भूतास्ततो बहुदेवदेवीपरिवृता हस्ते विद्युदुज्ज्वलन्तं चक्रं धारयन्ती चक्रेश्वरी देवी प्रकटीभूयैव-मुवाच भो वीर प्रागस्मै कुबुद्धिदायकाय सर्वानर्थमूलाय मित्राधमाय शिक्षां देहि तन्निशम्य क्षेत्रपालस्तं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मित्राधम पोतकुपस्तम्भेऽधोमुखं बद्ध्वा तन्मुखेऽशुचिं प्रक्षिप्य करवालेन तं खंडशः कृत्वा शान्तिकरणार्थं दिक्पालेभ्यो बलिदानमिव दशसु दिक्षु चिक्षेप। दुर्बुद्धिदायका एतादृशं दुःख त्वत्रैव भवे नरकादिदुःखं च परस्मिन्भवे प्राप्नुवन्तीति विचार्य सुखेच्छुना कस्मैचिदपि पापकर्तव्यकरणप्रेरणात्मका बुद्धिरपि न दातव्या अथ तद्व्यतिकरं वीक्ष्याऽत्यंतं भयाकुलो धवलस्तूर्णं श्रीपालपत्नीयुगलसमीपं गत्वा प्रणम्य चोवाच हे सुन्दर्यौ महासत्यौ युवयोः शरणागतं मां रक्षतं तन्निशम्य चक्रेश्वरी प्राह रे दुर्ज्जनमुख्य पापिन् धृष्ट विश्व-स्तोपकारिद्रोहकारिन् यदि त्वमनयोर्महासत्योः शरणं नागमिष्यत्तर्हिं निश्चयेनाऽद्य नाऽभविष्यत्त्वां सती-शरणप्रभावेणव जीवन्तं मुञ्चामि पुनरेतादृशं कर्तव्यं यदि करिष्यसि तर्हिं निश्चयेन दुःखसमुद्रे पतिष्यसि। ततश्चक्रेश्वरी विस्मितचित्तं श्रीपालपत्नीयुगलं प्रति प्राह हे वत्से युवां खेदं त्यजतं युवयोः स्वामी मासाभ्यन्तरेऽक्षतांगो बहुसमृद्धियुतो मिलिष्यति तन्निशम्यात्यर्थं हर्षिते ते प्रोचतुर्हे मातरावयो-र्यथाऽस्माद् दुष्टस्वभावाद् धवलाद्भयं न भवेत्तथा कुरु तदा देव्या कल्पपादपपुष्पमाले दत्वा प्रोक्तं वत्सेऽनयोर्मालयोः प्रभावेणाऽयं पापकर्मा युवां दुष्टुमपि समर्थो न भविष्यतीति प्रोच्य सपरिवारा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

चक्रेश्वरी गता समुद्रपोतमध्ये च सर्वत्र शान्ति र्व्याप्ता। अथ सज्जनस्वभावास्ते त्रयः सुहृदो धवलं प्रोचुर्भो श्रेष्ठिन् दुर्बुद्धिदानफलं दृष्टं ? त्वमपि सतीशरणेनैव जीवन्नसि। ततः पुनरेतादृशमभिलाषं मा कुर्याः। यद्यहर्निशं कामग्रहग्रथिलः परभार्यालालसोऽपि मनुष्यःकथ्यते तर्हि गर्दभसारमेयाऽजादयःकिं तस्मादन्ये सन्ति. परस्त्रियासक्तानां गुणयशःसदाचारादिकं सर्वमपि नश्यति. यदुक्तम्—दत्तस्तेन जगत्यकीर्तिपटहो गोत्रे मषीकूर्च्चकः। चारित्रस्यजलांजलिर्गुणगणारामस्य दावानलः॥ संकेतः सकलापदां शिवपुरद्वारे कपाटो दृढः। कामार्त्तस्त्यजति प्रबोधयति वास्वस्त्रीं परस्त्रींन यः॥१॥ स्वाधीनेऽपि कलत्रे, नीचःपरदारलंपटो भवति। संपूर्णेऽपि तडागे, काकःकुम्भोदकं पिबति॥२॥ ततो हे श्रेष्ठिन्सुखंवांच्छता त्वया परदाराभिलाषो न कार्य एवं तत्सुहृदः शिक्षां दत्त्वा स्वस्थानं गताः। अथ केषुचिद्वासरेषु गतेषु विवेकशून्यो धवल एवमचिन्तयदहो-ऽद्याऽपि मम पुण्यं जागर्ति तेनैतादृशो भयंकरोत्पातो विनाशं प्राप्तः श्रीपालस्याऽपरिमेया लक्ष्मीरपि मम हस्ते समागता अथ यदि श्रीपालभार्ये मम स्त्रीत्वं स्वीकुर्यातां तर्हि त्वहं वासवादप्यभ्यधिको भवेयमिति विचिन्त्य गतलज्जेन तेन दूतीमुखेन ते प्रार्थिते तदा कुपिताभ्यां ताभ्यां दूती बहुतिरस्कृता। ततो ज्ञात-



P.Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तद्वृत्तान्तोऽपि कामग्रथिलो धवलः कामध्यानलीनः कुत्राऽपि शान्तिमलभमानोऽन्येद्यु स्त्रीवेशं कृत्वा तयोः समीपं गतो यतः कामी तथाविध एव भवति. यदुक्तम्—कामीत्यजति सद्वृत्तं, गुरोर्वाणीं ह्रीयं तथा। गुणानां समुदायं च, चेतःस्वास्थ्यं तथैव च ॥१॥ तत्र तेन देवीदत्तमालाप्रभावेण ते महिले न दृष्टे ततोऽन्यवदितस्ततो भ्रमन् प्रपतंश्च स दासीभिरुपलक्षितो यष्टिमुष्टिभिश्च प्रकुट्य ततो निष्काशितस्तदा जर्जरीभूतांगोऽतिदुःखितःस कथंचन स्वस्थानं प्राप्तो निन्द्यकार्यकारित्वाच्च पोतजनेभ्योऽपि तिरस्कारं प्राप्तः। अहो विषयिणामेवंविधा विडंबना वीक्ष्यापि विषयान्धा बहुदुःखदायिभ्यो विषयेभ्यो न निवर्त्तन्ते कामो गुणसुखनाशकरो दोषदुःखप्रदश्चाऽस्ति तस्मात्सुखार्थिना त्याज्य एव. यदुक्तम्—दोषाणामाकरःकामो, गुणानां च विनाशकृत्। पापस्य च निजोबन्धु—रापदां चैव संगमः ॥१॥ मदनोऽस्ति महाव्याधि—र्दुश्चिकित्स्यः सदा बुधैः। संसारवर्धनोऽत्यर्थं, दुःखोत्पादनतत्परः ॥२॥ यावद्यस्यहि कामाग्नि—र्हृदये प्रज्वलत्यलम्। आश्रयन्ति हि कर्माणि तावत्तस्य निरन्तरम् ॥३॥ योगे पीनपयोधराञ्चिततनो र्विच्छेदने बिभ्यतां, मानस्याऽवसरे चटूक्तिविधुरं दीनं मुखं बिभ्रताम्। विश्लेषे स्मरवह्निनाऽनुसमयं दन्दह्यमानात्मनां, भ्रातः सर्व-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दशासुदुःखगहनं धिक्कामिनां जीवितम् ॥४॥ अथ धवलेप्सितं मार्गं विमुच्य पोताः स्वयमेव कुंकणजनपदवार्द्धितीरं प्राप्ता स्तदा पोतादवरुह्य बहुमुल्यं प्राभृतं गृहीत्वा धवलो राजसभास्थितपृथ्वीपालसमीपं समागत्य प्राभृतदानपूर्वकं नृपं प्राणमत्तदा भूमीपेन तस्मै सार्थवाहाय सबहुमानं श्रीपालहस्तेन ताम्बुलं दापितं। श्रीपालेन धवलः प्रागेवोपलक्षितो धवलश्च श्रीपालं धरित्रीपति समीपोपविष्टं वीक्ष्य संजातसंशयोऽचिन्तयत्किमयं स एव श्रीपालोऽस्त्यन्यो वा कोऽपीति चिन्तयञ्चिन्ताव्यग्रो विच्छायवदनो धवलो भूपं प्रणम्य तूर्णं बहिः प्रदेशमागत्य तद्विषये द्वारपालमपृच्छत्तदा द्वारपालेन श्रीपालस्य सर्वो वृत्तान्तः कथितस्तन्निशम्य वज्रप्रहत इवातीवदुःखितो धवलो हाऽगम्यं विधेर्वैपरीत्यं यद्यदहं चिन्तयामि करोमि च तत्तत्सर्वं विपरीतं भवतीति चिन्तयन्स स्वस्थानमायातः श्रीपालमारणोपायांश्च चिन्तयन् चिन्तावार्द्धिमग्नो रौद्रध्यानपरस्तत्राऽस्थात्। अहो एतादृशपापमतीनां सर्वे मनोरथा यदि सिध्येयुस्तर्हि जगति के केऽनर्था न संभवेयुः—यदुक्तम्—सर्पाणां च खलानां च, चौराणां च विशेषतः। अभिप्राया न सिध्यन्ति, तेनेदं वर्तते जगत् ॥१॥ एतादृशानां वांच्छिताऽसिद्धिरेव वर्या। "अयमत्राऽपि भूपसुतापतिः पृथ्वीप्रियः संजातो

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मया च महानपराधः कृतोऽस्ति तस्मान्नजाने किं भविष्यति तथाऽपि मयाऽस्य मारणोद्यमो न त्याज्यो यतः प्रयत्नवद्भयो जीवेभ्यो विधिरपि बिभेति " इति विचिन्तयति धवले तत्र कुतश्चिन्मातंगजातीयाः संगीतनृत्यादिकुशला गायकाः समागत्य नृत्यादिकं चक्रुः परं चिन्ताव्याप्तेन तेन तेभ्यः किमपि न दत्तं तदा मातंगेशेन प्रोक्तं श्रेष्ठिन् किमस्माकमुपरि क्रुद्धोऽसि येनाऽस्मभ्यं किमपि न ददास्यथवाऽन्यत्कारणमस्ति तदा धवलः प्राहाऽन्यत्कारणमस्ति युयं वैदेशिकाःस्थः ? मातंगेशेन प्रोक्तंवयं वैदेशिका एव स्मस्तदाश्रेष्ठी प्राह यदि युयमज्ञातकुलं भूपस्य जामातरं युष्मज्जातीयं नृपाग्रे ज्ञापयत तर्ह्यहं युष्मभ्यं दीनारलक्षं प्रयच्छेयं तन्निशम्य मातंगपतिः प्राह हे श्रेष्ठिन् वयमेतत्तव कार्यं करिष्यामः पश्चादेव त्वत्तो द्रव्यं गृहीष्यामस्त्वं निश्चिन्तो भवेति प्रोच्य ते मातंगा राजसभासमीपं गत्वा विविधवाद्यगीतनृत्यादिकं तथा चक्रुर्यथा तुष्टः पृथ्वीपो वांच्छितं प्रार्थयतेति जगाद तदा मातंगेशेन प्रोक्तं स्वामिन्नस्माकं वित्तेच्छा नास्ति किंतु सन्मानेच्छाऽस्ति भूपोऽवदत्कीदृशं सन्मानमिच्छथ तदा मातंगेशेन प्रोक्तं युयं विशिष्टसन्मानयोग्येभ्यः स्वपुत्रीर्पितहस्तेन तांबुलं दापयथ वयमपि तमेव सन्मानमिच्छामस्तदा



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

धरित्रीपतिना श्रीपालाय ताम्बुलदानाऽऽज्ञा दत्ता. श्रीपालोऽपि नृपाज्ञया यावन्मातंगेभ्यस्ताम्बूलानि ददाति तावदेका जरतीमातंगी हे पुत्र त्वमत्रकुत इति वदन्ती कुमारकंठे विलग्य पुनः प्राह वत्स त्वमस्माकं पुण्येनाऽद्य बहुदिनैर्मिलितः प्राक् तव रत्नद्वीपगमनं श्रुतं ततःप्रवहणप्रयाणं श्रुतं ततस्त्वं कुत्र कुत्र भ्रमणं कृत्वाऽत्र समागतोऽसि ? त्वया तु पुण्यवशेन भूपपूत्री परिणीता परं प्राक्परिणीताया अस्यास्तव बालपत्न्याःका गति र्भविष्यति तत एका प्राह हे भ्रातरद्य पुण्येन मीलितोऽस्यन्या प्राह हे देवर त्वमस्मान् मुकत्वा कथं गतस्ततः काचित्पितृभगिनी भूत्वा काचिन्मातृस्वसा भूत्वा काचित्पितामही भूत्वा काचिन्मातामही भूत्वा काचिन्मातुली भूत्वा काचित्पितृव्यपत्नी भूत्वा कश्चिज्जनको भूत्वा कश्चित्पितृव्यो भूत्वा कश्चिद् भ्राता भूत्वा कश्चिन्मातुलो भूत्वा कश्चित्पितामहो भूत्वा कश्चिचमातामहो भूत्वा तं वेष्टित्वा वियोगदुःखप्रकाशनपूर्वकं सुखपृच्छामकरोत्तन्निरीक्ष्य पृथ्वीपोऽचिन्तयद्धाहाऽनेन मातंगजातीयेन जामात्रा मदीयंनिर्मलंकुलं मलीनं कृतं ततोऽयं तूर्ण व्यापादनीय एव ततःक्रुद्धेन प्रजापालेन तस्य वधादेशात्प्राक् सर्वानर्थमूलं नैमित्तिकं मत्वा तमानाय्यकथितमरे त्वयाऽयं मातंग इति प्राकस्मान्नकथितं तदा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नैमित्तिकःप्राह पृथ्वीप नाऽयंमातंगः किन्तु मातंगाधिपोऽस्ति तन्निशम्य मातंगशब्दार्थानभिज्ञो भूपोऽत्यर्थं कुपितः सन् तयोर्वधार्थमादेशंदत्तवान् । तद्वृत्तान्तं श्रुत्वा भूपपुत्री मदनमंजरी तूर्णं तत्र समागत्य स्वजनकमवोचत् तात किमिदमविचारितं पश्चाच्छोचनीयमकार्यं समारब्धं किं लोकोत्तरचारेणास्य कुलंन ज्ञायते. लोकेऽप्येवं श्रुयते यदाचारेण कुलं ज्ञायते. यदुक्तं—आचारःकुलमाख्याति, वपुराख्याति भोजनम् । संभ्रमःस्नेहमाख्याति, देशमाख्याति भाषितम् ॥१॥ तन्निशम्य भूपेन श्रीपालाय प्रोक्तं तव कुलवृत्तान्तं कथय तदा किंचिद्धसित्वा श्रीपालःप्राह हे पृथ्वीप त्वयेयं लोकोक्तिः सत्यीकृता "यज्जलंपीत्वा पश्चाद्गृहं पृष्टव्यं" चेत्तव मत्कुलजाननेच्छा तर्हि सैन्यं सज्जं कुरु संग्रामे मत्करौ कुलं प्रकाशयिस्यतः स्वास्ये स्वकुलप्रकाशनमयुक्तमथवाऽधुना पोतागते मदीयेद्वे भार्ये मत्कुलप्रकाशं करिष्यत स्तन्निशम्य विस्मितेन पृथ्वीपेन स्वप्रधानपुरुषांस्तत्र संप्रेष्य सबहुमानं श्रीपालभार्ये स्वपार्श्वे समानाय्य श्रीपालकुलादिवृत्तं पृष्टं तदा स्वपतिसंयोगातिशयानन्दितयोस्तयोर्मध्याद्विद्याधरसुता स्वपतेर्सर्वं चरितमकथयत्तन्निशम्याऽत्यन्तं हर्षितो भूमीपतिः प्राहाहोऽयं तु मम सहोदरीसुतो मदीयसुतापतिः संजातः सुष्ठु संजातं भोजने पतितघृतं



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वत्सुष्ठुसंजातं। अथ पृथ्वीपः श्रीपालं क्षमयित्वा तस्मै च बहुमानंदत्त्वा कुपितः सन् मातंगानपृच्छदरे दुष्टा युष्माभिरयं मातंगः कथं कथितस्त दाऽतिभयकंपमानां गाऽऽत्तेऽवोचन् देव धवलसार्थपतिर्द्रव्यदानेनास्मान् लोभयित्वैतदकार्यमकारयत्। तच्छ्रुत्वाऽतिकुपितो भूपतिः पोतात्कुमारभार्याऽऽनयनकालादेवाऽत्यर्थं भयकंपमानांगं विच्छायवदनं धवलं गाढबन्धनबद्धं विधाप्य समानाययत्ततोऽतिशयपरुषवचनैर्निर्भर्त्स्य समातंगकुटुंबस्य धवलस्य वधार्थं नृप आदेशं दत्तवान्। तदा करुणावारिधिः सज्जनमुख्यः श्रीपालः प्रजापतिं विज्ञप्य कथमपि समातंगं धवलममोचयत्ततो धरित्रीपतिना मातंगपतिशब्दार्थकृते पृष्टो नैमित्तिकः प्राह पृथ्वीप मातंगशब्देन करिणः कथ्यन्ते तेषामयं स्वाम्यस्ति विशेषेण भविष्यति च तन्निशम्य हर्षितो धरापो वस्त्रालंकारादिभिर्नैमित्तिकं सत्कार्याऽवोचदहो पश्यत खलु श्रीपालधवलयोरमृतविषवत्कीदृशमन्तरमस्त्येकोऽपकारिणोऽप्युपकारपरः सज्जनमुख्योऽन्यश्चोपकारिणोऽप्यपकारपरो दुर्जनमुख्यश्चाऽस्त्येवं धवलं विना सर्वैरपि श्रीपालप्रशंसनं धवलगर्हणं च कृतं ततः सर्वे स्वस्वस्थानं गताः सर्वत्र विस्तृतां श्रीपालप्रशंसां श्रुत्वा धवलो हृदये ज्वलतिस्म। अथ तत्र तिसृभिर्भार्याभिः सह

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

देवकुमारवत्सुखं भुंजानो धर्मकार्यपरः श्रीपालः सरलस्वभावत्वाद् मलीनहृदयेन धवलेन सह पूर्ववत्प्रीतिं चकार. धवलश्च दुष्टस्वभावत्वादेवं चिन्तयति हाऽहं यद्यत्करोमि त-तत्सर्वं निष्फलं भवत्येवं स्थितेऽपि मयोद्यमो न त्याज्योऽयं कथमपि मया घातनीय एव येन सर्वाऽप्यस्य समृद्धिर्ममैव भवेत्। अहो दुर्जनानां दुर्जनत्वं किमेभिर्मुषकेभ्य ईदृशीपरद्रोहकरी विद्या शिक्षिता ? यदुक्तम्.

आखुभ्यः किं खलैर्ज्ञातं, खलेभ्यः किमथाखुभिः। येषां परगृहोत्खाता—दन्यत्कर्म न विद्यते ॥१॥

अथैकदा रात्रौ श्रीपालावासस्थितो धवलोऽचिन्तयदयमेकाकी सप्तमभूम्यां सुप्तः श्रीपालः सुखं वध्योऽस्ति तस्मादेनं हत्वाऽस्य भार्या अपि प्रसह्य भुनज्मि समृद्धिरपि स्वहस्तगता करोमीति विचार्य दुष्टहृदयः स करे करवालं गृहीत्वा श्रीपालवधार्थं धावमानः स्खलितपादः सप्तमभूम्या अधः पतितः स्वहस्तस्थकरवालविदारितहृदयश्च स दुर्ध्यानपरो मृत्वा सप्तमनरकपृथ्व्यां समुत्पन्नोऽहोऽन्यस्य कृते गर्त्तां खनंस्तस्मिन्स्वयं पततीति लोकवार्ता सत्या जाता। किं चाऽनुचितफलाऽऽकांक्षा न युक्ता यदुक्तम्.

अनुचितफलाभिलाषी, दैवेन निवार्यते बलात्पुरुषः। द्राक्षाविपाकसमये, मुखरोगो भवति काकानाम् ॥१॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अथ प्रातःकाले तथाऽवस्थं धवलं वीक्ष्य बहुलोकास्तत्र मिलिताःपरस्परं चाऽवोचन् नूनमयं पापिष्ठहृदयो धवलोऽत्रोपकारिणः श्रीपालस्य वधार्थं समागत्य स्वयमीदृश्यवस्थां प्राप्तो दृश्यतेऽहोऽस्याऽधमत्वं क्रूरत्वं धिग-स्त्वेनं दुर्जनमुख्यमनेनाऽतिदुष्टहृदयेन यत्परार्थं दुःखं चिन्तितं तस्मिन्स्वयमेव पतित इत्यादि लोककोलाहलं श्रुत्वा ज्ञातवृत्तान्तः शोकव्याप्तः श्रीपालः सदुःखं शीघ्रं तत्र समागत्य स्वपितृव-तस्य मृत्युकृत्यं च विधाय धवलश्रेष्ठिसमृद्धिरक्षणार्थं तस्य सन्मतिदायकं मित्रत्रयमस्थापयत्तदा श्रीपालस्य लोके महती प्रशंसा प्रवृत्ता । अथ श्रीपालस्त्रिभिः स्वपत्नीरत्नैः सह सांसारिकं सुखं भुंजानो धर्मकार्यपरस्तत्र सुखेन स्थितः सन्नेकदा पुराद्बहिर्वनलीलां दृष्टुं गतस्तत्र तदैकः सार्थः समागतोऽभूत्तन्मध्यात्सार्थपतिः श्रीपालं वीक्ष्य सप्राभृतस्तत्र समागत्य श्रीपालं प्राणमत्तदा श्रीपालेन पृष्टं भो सार्थेश युष्माकं कुतः स्थानात्समागमनं संजातं कुत्र च गमनं भविष्यति चेत्कुत्राऽप्याश्चर्यं दृष्टं भवेत्तर्हि कथय तदा सार्थाधीशः प्राह कान्तिपुरादस्माकमागमनं संजातं कंबुद्वीपे च गमनं भविष्यति यच्चाश्चर्यं दृष्टं तत्कथयामि त्वं श्रुणु–इतो योजनशतदूरे कुंडलपुराभिधं पुरमस्ति तत्र राज्यं कुर्वतो मकरकेतुभूपस्य कर्पूरतिलकाभिधराज्ञीतो द्वयोः



Jun Gun Aaradhak Trust

पुत्रयोरुपर्येका गुणसुंदर्यभिधा पुत्री जाता रूपतिरस्कृतरंभया प्राप्तयौवनया तयैवं प्रतिज्ञा विधत्ताऽस्ति यो मां वीणाकलया जेष्यति तस्याऽहंभार्या भविष्यामि तां वार्तां श्रुत्वात्र बहुपृथ्वीपालपुत्राः समागत्य वीणा-कलाऽभ्यासं कुर्वन्ति प्रतिमासं तेषां परीक्षा भवति परमद्य यावत्कोऽपि तां वीणा कलयानाऽजयत्

एकस्मिन्परीक्षावासरे मया रूपनिर्जितकामभार्या सा स्त्रीश्रेष्ठा दृष्टाऽस्ति त्वं चाऽद्य पुरुषश्रेष्ठो दृष्टोऽसि यद्यघटमानोऽपि युवयोः कथमपि संयोगो भवेत्तर्हि विधातुः प्रयत्नं सफलं मन्ये. तन्निशम्य श्रीपालः सार्थाधीशं वर्यवस्त्रादिभिःसत्कार्य संध्यासमये च स्वावासं समागत्याऽचिन्तयत्कथमेतादृशमाश्चर्यं दृश्य-तेऽथवाऽनया चिन्तयाऽलं श्रीसिद्धचक्रध्यानेन किमप्यसाध्यं नास्तीति विचिन्त्य निर्मलचित्तःस याव-त्सिद्धचक्रध्यानलीनोऽभवत्तावत्तत्र प्रथमसुरलोक वास्तव्यः सिद्धचक्राधिष्ठायको विमलेश्वरःसुरो हस्तस्थित-मणिहारः प्रकटीभूय श्रीपालमवोचत् श्रीपाल यस्मिन्कंठस्थे वांछितरूपं गगनगमनं समग्रकलानैपुण्यं सकलविषहरणं च भवति तमेनं हारं गृहाणाऽहं श्रीसिद्धचक्राधिष्ठायको विमलेश्वरसुरोऽस्मि त्वं सिद्धचक्र-भक्तिध्यानं सदा कुर्याः कार्ये च समापतितेमां स्मरेरिति प्रोच्य श्रीपालकंठे हारं संस्थाप्य स सुरःस्वस्थानं



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जगाम । अथ हारप्राप्त्या संजातानन्दः श्रीपालः सुखेन निद्रां कृत्वा प्रत्युषि जागरितः सन् कुंडलपुरगमनेच्छामकरोत्क्षणेन स हारप्रभावात्कुंडलपुरसमीपस्थं स्वमपश्यत्ततः स्वकुब्जरूपं कृत्वा नगरे प्रविशन् स सकौतुकं पौरैः वीक्ष्यमाणः प्रतिस्थानं वीणाध्ययनपरान् जनान्पश्यन् कैश्चिद्दर्पवेशधरै वीणाहस्तैः पृथ्वीपकुमारैः सह वीणाकलाध्यापननिपुणाध्यापकसमीपं गत्वा तं प्राह मां वीणाकलामध्यापय तदा वीणाध्ययनपरै र्भूपकुमारैरित्यर्थे हसित्वा श्रीपालं प्रति प्रोक्तं भो कुब्जत्वं केन प्रयोजनेनाऽत्राऽऽगतः ? कुमारःप्राह येन प्रयोजनेन युयमागतास्तेन प्रयोजनेनाऽहमपिसमागतस्तन्निशम्य कुमाराः प्रहस्य प्राहुस्तर्हि तु भूपपुत्र्या महद्भाग्यं ततःस कुब्जः स्वं बहुमूल्यं खड्गरत्नं पाठकाय दत्त्वा तं सतुष्टं विधाय तद्दत्तवीणां च गृहीत्वा हास्यरसोत्पादनार्थं तथाऽवादयद् यथा वीणायास्तंत्रीतुम्बीदंडादिकं सर्वमपि भग्नं सर्वेराजकुमाराश्च प्रहस्य श्रान्ता एवं विनोदकरणपरः स कुब्जो दानबलेनोपाध्यायं स्वाधीनं कृत्वा कंचित्कालमगमयतावत्परीक्षादिनमागतं सर्वेऽपि परीक्षासभायां समागता द्वारपालेन च रुद्धः कुब्जोऽपि तस्मै स्वर्णकटकं दत्वा सभां प्रविष्टस्तदा भूपपुत्र्या तस्य मूलं रूपं दृष्ट्वा चिन्तितं यद्ययं पुरुषो मां वीणाकलया जयेत्तर्हि तु मम

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

महद्भाग्यमन्यथा प्रतिज्ञां कृत्वाऽहं स्वस्यैव वैरिणी जाता। अथ पाठकाज्ञया सर्वेऽपि पृथ्वीपपुत्राद्याः स्वां स्वां वीणाकलामदर्शयंस्ततो भूपपुत्र्या स्वीयां वीणाकलां दर्शयित्वा राजकुमारादीनां कलाकुशलत्वमाच्छादितं तत्र पृथ्वीशपुत्र्या महतीप्रशंसा जाता तदा कुब्जः प्राहाऽहो पौराणां बुद्धिमत्त्वं तन्निशम्य कुमारी चमत्कृता स्वं हास्यं संजातमिति च मत्वा लज्जिता सती स्वां वीणां कुब्जायाऽदात् तदा कुब्जोऽवोचदस्या वीणायास्तंत्रीतुम्बीदंडादिकं सर्वमप्यशुद्धमस्तीति प्रोच्य तस्या दोषान् दर्शयित्वा तां च शुद्धां विधाय तथाऽवादयद्यथा सर्वेऽपि मूर्च्छिता इव निश्चेष्टाः संजाता स्तदा कुब्जेन तेषां मुद्राकटकमुकटकुंडलोत्तरीयवस्त्रादिकं गृहीत्वा सभामध्ये महावकरमकरोत्ततो जागरिता लोकाः स्वस्ववस्तुराशिं दृष्ट्वाऽत्यर्थं चमत्कृताः। स्वप्रतिज्ञां च पूर्णां वीक्ष्याऽतिशयाऽऽनंदिता राजपुत्री श्रीपालकंठे वरमालां चिक्षेप. श्रीपालं कुब्जं पश्यन्तः पृथ्वीशादयो हा हाऽनया कुब्जो वृत इति हाहारवंचक्रुस्तदा श्रीपालस्तेषां मनःशान्त्यर्थं स्वं मूलरूपं प्रकटीचकार यद्वीक्ष्य सर्वेऽप्यत्यर्थं प्रमुदिताः प्रहृष्टेन भूपेन च महतामहेन श्रीपालेन सह स्वपुत्र्या विवाहं कृत्वाताभ्यां बहुहस्त्यश्वरथभटवस्त्रमणिमौक्तिकसुवर्णालंकारादिना सह निवासाय महाप्रासादो दत्तः



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्रीपालस्तत्र स्वपत्न्या सह सांसारिकं सुखं भुंजानो धर्मकार्यपरोऽस्थात् ।

अथैकदा पुराद्बहिर्गतेन श्रीपालेनैकः पथिको दृष्टःपृष्टश्च भो कुतस्त्वमागतः कुत्र च यास्यसि किमपि चेदाश्चर्यं दृष्टं तर्हि कथय तदा पथिकःप्राह देव कुंडनपुराद् धनावहधनिप्रेषितोऽहं प्रतिष्ठानपुरं गच्छामि । आगच्छता मया यदाश्चर्यं दृष्टं तच्छृणु–कंचनपुरेशस्य वज्रसेनभूपस्य कनकमालाऽभिधराज्ञीतश्चतुर्णा-पुत्राणामुपर्येका निरुपमरूपलावण्या त्रिलोकसुन्दरीनाम्नी पुत्री संजाता तस्यास्तुल्यं वरमप्राप्नुवता भूपेण तत्र स्वयंवरमंडपो विधत्तोऽस्ति तत्र भूपेन समाहूता बहुपृथ्वीपालाः सकुमाराः सैन्ययुताः समागताः सन्ति तेषां सत्कारार्थं राज्ञा ये धान्यतृणादीनां राशयःसंगृहीताः सन्ति ते तु पर्वतेभ्योऽपि महान्तोदृश्यन्ते । तत्र स्वयंवरमंडपे सा राजसुताऽऽषाढासितद्वितीयायां स्वेष्टं वरं वरिष्यति तद्दिनं श्वो विद्यते तन्नगरं चेतो योजनशतत्रयं दुरेऽस्ति तन्निशम्य सानन्दः श्रीपालः पथिकाय स्वर्णभूषणं दत्वा स्वा वासं समागत्य निद्रां विधाय रजन्याः पाश्चात्यप्रहरे हारानुभावात्कुब्जरूपं च कृत्वा कंचनपुरमागतस्तत्र स्वीयातिबिभत्स-कुब्जरूपेण सर्वत्र हास्यरसं जनयन् स्वयंवरमंडपद्वारसमीपं समागतो द्वारपालेन च रुद्धःसंस्तस्मै हस्त-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्वर्णकटकं दत्वा मंडपान्तः प्रविश्य स्वर्णस्तंभपुत्तलिकासमीपे समुपविष्टस्तं समुन्नतपृष्टं संकुचितोदरं चिपुटनासिकं प्रलंबोष्टं गर्दभदन्तं कपिलकेशं पिंगलनयनं वीक्ष्य भूपकुमाराः प्रहस्य प्रोचुर्भो कुब्ज त्वं केन कारणेनाऽत्राऽऽगतोऽसि तदा कुब्जःप्राह येन कारणेन युयं समायातास्तेन कारणेनाऽहमपि समागतस्तन्निशम्य बृहच्छब्देन सुबहु प्रहसन्तस्ते प्राहुरहो सा भूपसुता सुरूपं भाग्यशालिनं त्वां पतित्वेनाऽस्वीकृत्य कथं सुखिनी भविष्यति तस्मान्निश्चितं भाग्यशालिनी सा त्वामेव वरिष्यतीत्थं तेषु सहास्यं वार्तालापं कुर्वत्सु वर्यनेपथ्या भूषणशोभितांगा हस्तस्थितनिर्मलवरमाला शिबिकारूढा पृथ्वीपालपुत्री स्वर्णपांचालिकाशोभितमणिस्तंभनिर्मिते मंचातिमंचश्रेणिसमुपविष्टानेकदेशभूपाले तस्मिन्स्वयंवरमंडपे समागान्मूलरूपेण च श्रीपालं वीक्ष्य सानन्दा साऽचिन्तयद् धन्याहं कृतपुण्याहं यस्याः कृत ईदृशः पुरुषोत्तमः कुतोऽपि समागतः। तदा सानुरागिणीं तां. श्रीपालोऽपि सानुरागदृष्ट्याऽपश्यदन्तराऽन्तरा च स्वं कुब्जरूपमर्पितां। प्रत्यदर्शयत्ततो भूपालदेशवंशशक्तिसमृद्ध्यादिवर्णनदक्षा प्रतिहारिणी राजपुत्रीं पृथ्वीपपंक्तिसमीपं समानीय यं यं पृथ्वीपं भूपपुत्रं च वर्णयामास तं तं नरेन्द्रसुता देशकुलवयःशक्ति-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रूपादिदोषदानपूर्वकं त्यजन्तीपुरश्चचाल । तस्मिन्काले यं यं भूपपुत्रं वा प्रति भूपं हारिणी वर्णयामास स स सानदः प्रफुल्लवदनश्चाऽभूत् परं यं यं त्यक्त्वा भूपसुता, पुरश्चचाल स स निरानन्दः श्याममुखश्चाभूत् । अथ यदा सर्वान्नृपराजकुमारान् वर्णयित्वा प्रतिहारिणी श्रान्ता तदा भूपपुत्री स्वप्रेमपात्रकुब्जसमीपं समागत्य विलक्षा तं कुब्जं पश्यतिस्मः । तस्मिन्नवसरे श्रीपालहाराधिष्ठायकोदेवः स्तंभस्थितपुत्तलिका-मुखेऽवतीर्य जगाद हे राजसुते यदि त्वं प्रज्ञावती गुणदोषविशेषज्ञा सुखवांच्छका चाऽसि तर्हि त्वमेनं कुब्ज-रूपधरं पुरुषोत्तमं वृणु तन्निशम्य सानंदा भूपसुता कुब्जकंठे शीघ्रं वरमालामक्षिपत्कुमारश्च स्वं विशेषेण कुब्जरुपमदर्शयत्तन्निरीक्ष्याऽतिकुपिता भूपाला अवोचन्नरे कुब्ज गुणान्तरमजानन्त्याऽनया बुद्धिहीनया मुग्धया भूपपुत्र्या राजहंसतुल्यनरेन्द्रसमूहं त्यक्त्वा यद्यपि वायससदृशस्य तव कंठे वरमाला क्षिप्ता तथापि वायसकंठे रत्नमालावद् वयमीदृशं संबन्धं न सहामो तस्मादेनां वरमालां त्यज नो चेदनेन तीक्ष्ण-खड्गेन वरमालया सह ते शीर्षं च्छेत्स्यामस्तन्निशम्य प्रहस्य कुब्जःप्राह भो भूमीपा युस्मद्दुर्भाग्य योगेन-यदि युष्माभिः स्त्रीरत्नं न प्राप्तं तर्हि दुर्भाग्यं प्रति कथंकोपं न कुरुत । अथ परभार्यावांच्छा संजातपाप-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मलीनानां युष्माकं शुद्धिरनेन मदीयखड्गतीर्थेनाऽहमेवकरोमीतिप्रोच्य तेन कब्जेन स्वपराक्रमस्तथादर्शितो यथा ससैन्याः सर्वेऽपि भूपाः पराजयं प्राप्य पलायिता देवैश्च तस्योपरि पुष्पवृष्टिःकृता तद्वीक्ष्याऽतीवानंदितो वज्रसेनभूपःकुब्जं प्रति प्राह हे वत्स यथा त्वया स्वं भूजबलं दर्शितं तथा स्वं रुपमपि दर्शय तत्समाकर्ण्य श्रीपालेन स्वं मूलरुपं दर्शितं तदा तं, निरुपमरुपं वीक्ष्याऽत्यर्थं हृष्टः प्रजेशस्तेन सह स्वां पुत्रीं महामहेन पर्यणाययत् करमोचनावसरे च तस्मै. प्रभूतकरिहयरथभटदासदासीवर्यवस्त्रालंकारादिकां समृद्धिं ददौ। ततो धनधान्यादिवस्तुसंपूर्णे भपदत्ते वर्यप्रासादे वसन् स्वपत्न्या त्रिलोकसुंदर्या सह सांसारिकं सौख्यं भुंजानो धर्मकार्यपरः श्रीपालः कालं गमयतिस्मः ।

अथैकदा कश्चित्पुरुषो भूपसभायां समागत्य प्राह स्वामिन् दलपत्तनपुरे धरापालाभिधो धरापालोऽस्ति तस्य भूपकुलोत्पन्नासु चतुरशीतौ राज्ञीषु प्रवराया गुणमालाभिधायाःपट्टमहिष्याः पंचानां पुत्राणामुपरि शृंगारैर्विनैवसुंदरा शृंगारसुंदरी नाम पुत्रीसंजाताऽद्भुतरूपवती क्रमेण विज्ञातसर्वकला तत्त्वज्ञा सर्वज्ञशासन-भक्ता सा तारतारुण्यंप्राप्ता तस्याः सर्वज्ञशासनभक्ताः पंडिताविचक्षणाप्रगुणानिपुणादक्षाभिधाः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पंच सहचर्यः सन्ति ताः सर्वा अपिपृथ्वीशपुत्र्या सहैव सुदेवगुरुधर्माराधनादिकं कार्यं कुर्वन्ति। अथान्यदा भूपपुत्री तासां पुरः प्राह योऽस्माकं षण्णामप्येक एव पतिः कर्तव्योऽस्ति स तु तत्त्वज्ञो जिनधर्म-भक्त एव कर्तव्यो नाऽन्यो यतोऽसदृशधर्मपतिना सह कृतः संबन्धो यावज्जीवं दुःखप्रदो भवति पुनः परीक्षया विना तादृशवरप्राप्तिरपि दुर्लभा तस्मात्तत्परीक्षार्थमस्माभिः श्लोकैकपादरूपाणि पंचसमस्यापदानि निश्चित्य पृष्टव्यानि यः पुरुषः समश्या पदतुल्यसंबन्धेन श्लोकान् संपूर्णीकृत्याऽस्माकंहृद्गतं भावं कथयिष्यति सोऽस्माकं वरो भविष्यति। भूपपुत्र्याः सा वार्ता सखीभिः प्रतिपन्ना ततः क्रमेण सर्वत्र विस्तृतां तां वार्तां श्रुत्वा तत्र बहुदेशेभ्यो विद्वांसः समागताः सन्ति वहवः पृथ्वीशकुमारादिजनाश्च तत्रागत्याध्ययनं कुर्वन्ति परमद्य यावत्कोऽपि समस्यापदश्लोकपूरणेन तासां हृद्गतं भावं वक्तुं समर्थो नाऽभवदेवं दृष्टमाश्चर्यं मया कथितं तन्निशम्य सर्वेऽपि साश्चर्याः सन्तः प्राहु रहोमहदाऽऽश्चर्यमेतत्किं कोऽपि कस्यचिद्धृदयगतं भावं वक्तुं समर्थो भवेत्। अथ श्रीपालस्तं वृत्तान्तं श्रुत्वा साश्चर्यः सानंदः सन् स्वावासं समागत्य निद्रा-सुखमनुभूय प्रातःकाले शृंगारसुन्दरीसमीपगमनचिन्तनं कृत्वा हारप्रभावेण यत्र मंडपे सखीयुता



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

शृंगारसुदर्यस्ति तत्रागतस्तं निरुपमरूपं दृष्ट्वा भूमीशपुत्र्यचिन्तयद्यदि कथमप्येषः पुरुषोत्तमोः मम प्रतिज्ञां पूरयिष्यति तर्हि तु कृतप्रतिज्ञाहं धन्या भविष्यामि। ततः कुमारः प्राह भो नरेन्द्रकुमारि? तव समस्यापदानि ब्रूहि तदा कुमारीप्रेरिता प्रथमा पंडिता सखी प्राह—वांच्छाफलं चित्तगतं भवेच्च अनया भूमीशपुत्र्या यदि सखीवदनेन प्रोक्तं तर्ह्यहं पुत्तलकमुखेन पूरयामीति विचिन्त्य श्रीपालेन समीपस्थपुत्तलकमस्तके स्वहस्तः स्थापितस्तदा पुत्तलकः प्राह—ये सिद्धचक्रं परमं पवित्रं, ध्यायन्ति नित्यं निजमानसे हि। तेषां नराणां च तथा च स्त्रीणां, वांच्छाफलं चित्तगतं भवेच्च ॥१॥ ततो द्वितीया विचक्षणा सखी प्राह—ह्यन्यच्च लोकेऽत्र विलापतुल्यं—तच्छ्रुत्वा पुत्तलकोऽवोचत्—देवो जिनेशश्च गुरुर्यथार्थ—वक्ता हि धर्मेषु दया प्रधानः। मन्त्रेषु सारः परमेष्ठिमन्त्रो, ह्यन्यच्च लोकेऽत्र विलाप तुल्यं ॥२॥ ततस्तृतीया प्रगुणा सखी प्राह—आत्मा हि येन सफलीभवेच्च—तच्छ्रुत्वा पुत्तलकः प्राह—आराधयत्वं सुगुरुं सुदेवं, दानं सुपात्रेकुरु सत्सु संगम् तीर्थेषु यात्रां कुरु नित्यमेव, आत्मा हि येन सफलीभवेच्च ॥३॥ ततश्चतुर्थी निपुणा सखी प्राह—यावद्धिधात्रा लिखितं ललाटे—तच्छ्रुत्वापुत्तलकःप्राह—हे चित्त खेदं परिमुंच नित्यं, चिन्तासमूहे न कुरुष्वजीवं। फलं भवेदत्र

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

परत्र तावद्, यावद्विधात्रा लिखितं ललाटे॥४॥ ततःपंचमी दक्षा सखी प्राह—तस्यैव दासाश्च त्रिलोकलोकाः तच्छ्रुत्वा पुत्तलकोऽब्रवीत्—यत्संचितं पूर्वभवे भवेच्च, तेनैव पुण्येन भवन्ति कामाः। भोगाश्च राज्यं च शिवेष्टसौख्यं, तस्यैव दासाश्च त्रिलोक लोकाः॥५॥ ततआश्चर्यकृत्तस्य हृद्गतभावनिवेदकं समस्यापूरण-प्रकारं वीक्ष्य सखीभिः सहानीवानंदिता भूपसुता श्रीपालकंठे वरमालां चिक्षेप तं समस्यापूरणवृत्तान्तं श्रुत्वा सलोकः पृथ्वीपोऽतीवाश्चर्यचकितः संजातस्ततो योग्यजामातृलाभादानन्दरोमांचितांगेन पृथ्वी-पेन सखीभिर्युता स्वसुता श्रीपालेन सह महामहेन परिणायिता प्रभूता समृद्धिश्च दत्ता। तस्मिन्नवसरे कश्चित्सुभट आश्चर्यकृत्कुमारचरितं वीक्ष्य प्रोच्चैःप्राह भोभो शृणुत—कोल्लागपुरे पुरंदरविक्रमः पुरंदराभिधः पृथ्वीपतिरस्ति तस्य रूपाधरीकृतरतेर्विजयाभिधपट्टमहिष्याः सप्तपुत्रोपरि सौन्दर्यजितसरस्वती जय-सुन्दरी नाम पुत्री संजाता प्रकर्षबुद्धिमती सा स्तोककालेन सर्वकलानिपुणा साक्षात्सरस्वतीव व संजाता। तादृशीं निरुपमरूपकलायुतां स्वपुत्रीं वीक्ष्य तत्तुल्यवरचिन्तापरं नृपतिं ज्ञात्वाऽवसरंप्राप्य भूपसुताध्या-पको भूपमवोचत्पृथ्वीप कलाभ्यासं कुर्वत्या तव पुत्र्या क्रमप्राप्तराधावेधस्वरूपमहं पृष्टस्तदा मया प्रोक्तमे-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कस्योच्चतरस्तंभस्योपरि यन्त्रयोगेन चतुर्षु च वामावर्तेन भ्रमत्सु चक्रेष्वुपरिस्थापितराधाभिधकाष्ठ-पुत्तलिकाया वामाक्षीमधःस्थापिततैलभृतकटाहे प्रतिबिम्बितां वीक्ष्याऽधोमुखदृष्टिः सन् यः कोऽप्यूर्ध्वी-कृतशरेण विध्यति तेनैव राधावेधः साधितः कथ्यते स च राधावेधः केनचिदेव पुरुषोत्तमेण साध्यते। तन्निशम्य तत्र पुत्र्यैवं निश्चयःकृतोऽस्ति यःकोऽपि मत्समक्षं राधावेधं साधयिष्यति तमेव पुरुषोत्तममहं वरिष्ये तदध्यापकोक्तं श्रुत्वा पृथ्वीशेन राधावेधसामग्रींकृत्वा बहवोदेशाधिपा आकारिताः सन्ति परमद्यापि केनाऽपि स राधावेधः साधितो नास्ति स च राधावेधो माहात्म्य निधिनाऽनेनैव कुमारेण भविष्यतीत्यहं मन्ये इति प्रोच्य विरताय सुभटाय कुंडलं दत्वा श्रीपालो भूमीशदत्तावासं समागतः प्रातःकाले हारप्रभावेण बहुनरेन्द्रादिव्याप्तं राधावेधस्थानं समागत्य हारानुभावाद् राधावेधमसाधय-त्तदाऽऽनंदपुलकितांगी जयसुन्दरी तत्कंठे वरमालामक्षिपत्ततो वर्यजामातृप्राप्तिहृष्टेन भूपेन महतामहेन श्रीपालेन सह स्वसुताया विवाहः कृतः प्रभूतसमृद्धिदानपूर्वकं च निवासाय महाप्रासादस्तस्मै दत्तस्तत्र जयसुन्दर्या पत्न्या सह संसारसौख्यमनुभवन्धर्मकार्यपरः श्रीपालः सुखेन तस्थौ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अथान्यदिने कुमारमातुर्भूपेन्द्रनरास्तस्थानयनकृते तत्र समागता स्तदा श्रीपालेन स्वभार्या-नयनकृते स्वपुरुषाः प्रेषितास्ततश्च कुमारपत्न्योऽपि स्वस्वसहोदरयुतास्तूर्णंतत्रायातास्तस्मिन्नवसरे तत्र श्रीपालस्य वर्यहस्तिहयरथादिकं बहुसैन्यं मिलितं तेन महतासैन्येन युतः श्रीपालोऽविछिन्नप्रयाणैः शीघ्रं मातुलपृथ्वीशसमीपं समागतो मातुलभूपश्च तादृशीं श्रीपालसमृद्धिं वीक्ष्यात्यर्थं संतुष्टस्ततो बहुभूपालयुतः श्रीपालं स्वराज्ये विधिपूर्वकमस्थापय त्तदा राज्यसिंहासनोपविष्टो वर्यहारमुकुट कुंडलाद्यलंकारशोभितां-गश्चामरातपत्रादिराजचिह्नविराजितः श्रीपालपृथ्वीपालोऽत्यन्तं शुशुभे प्राभृतकराणां च भक्त्या प्रणमतां बहुपृथ्वीपालादीनां प्राभृतानि स्वीचकार । ततः पोतादिसमृद्धि युतोऽगण्यचतुरंगसैन्यसहितोऽनेक पृथ्वीशसामन्तादिपरिवृतः श्रीपालः स्वमातृचरणनमनार्थमुज्जयिनीं प्रति प्रयाणमकरोत् । मार्गे गच्छंश्चस स्थाने स्थाने प्राभृतकराणां सविनयं प्रणमतां भूपालानां प्राभृतानि स्वीकुर्वंस्तेभ्यश्च संमानं यच्छन् क्रमेण सोपारकनगरपरिसरं प्राप्तस्तत्र सोपारकेशमनागतं वीक्ष्य श्रीपालो यावत्स्वामात्यान् पृच्छति ताव-त्तत्र सोपारकेशमन्त्रिणा समागत्य प्रणम्य च प्रोक्तं स्वामिन्नत्र महसेनाभिधेयो धरित्रीपोऽस्ति तस्य

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ताराभिधपट्टमहिष्याः संजाताऽत्यद्भुतरूपलावण्यवती तिलकसुन्दरी नाम सुताऽस्ति सा केनचित्क्रूर-
सर्पेणाऽद्यैव दष्टाऽस्ति पृथ्वीपेन बहुमणिमन्त्रौषधीनामुपचाराः कारिताः परं सा न जीविता ततो दुःखित-
हृदयो भूपस्तस्या दहनक्रियाकृते श्मशानं गच्छन्नस्ति मांचात्र प्रेषितवानतो भवताऽप्रसादो नैव विधा-
तव्यस्तन्निशम्योपकारिशिरोमणिः श्रीपालनरेन्द्रः प्राह भो मन्त्रिन् सर्पदष्टा सा कुत्राऽस्ति तूर्णं मां दर्शय
येन कश्चिदुपायः क्रियत इति प्रोच्य श्रीपालः शीघ्रमश्वारूढोभूत्वा मन्त्रिणा सह यत्र श्मशाने नृपादयस्तां
नीतवन्त स्तत्र समागत्य प्राह मां तूर्णं सर्पदष्टां कन्यां दर्शयत तदा महसेनभूपः प्राह नृपेन्द्र मृतकदर्शनेन
किं तदा श्रीपालः प्राह सर्पदष्टाः प्रायेण मृततुल्यां मूर्च्छां लभन्ते तस्मात्तादृशानां दहनक्रिया तूर्णं न
कार्या तन्निशम्य महसेनेन स्वसुता दर्शिता श्रीपालेन च स्वकंठस्थितहारवारिणा सिक्ता तदा सा सुप्तो-
त्थितेव शीघ्रमुत्थिताऽतिविस्मिता च प्राह तात कस्मादत्र लोकसमूहो दृश्यतेऽहं च कथमत्रानीता
तन्निशम्य तत्पित्रा सर्वं वृत्तान्तं प्रोच्य पुनः प्रोक्तं हे वत्से यद्ययं महाराजो नाऽगमिष्यत्तर्हि त्वं कथं जीवि-
ताऽभविष्यत्तच्छ्रुत्वा सानंदया कुमार्या श्रीपालं प्रति स्निग्धनेत्रं निरीक्षितं तदा तत्पिता श्रीपालं प्रतिप्राह

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हे कृपासमुद्र भूपेन्द्र भवताऽस्य जीवितं ददताऽस्मभ्यमपि जीवितमेव दत्तमस्ति तस्मादस्मदीयप्राणाभ्यधिकामेनां स्वीकृत्याऽस्मान् प्रीणय तन्निशम्य श्रीपालेन तत्स्वीकृतं तदा महसेनेन स्वपुत्र्यास्तेन सह विवाहं कृत्वा एस्मै च भूरिसमृद्धिं दत्वा ससैन्यः स्वयमपि श्रीपालेन सहैव प्रयाणमकरोत्। अथात्यद्भुतरूपलावण्यकलागुणवतीभिरष्टभिः पत्नीभिर्युतोऽपि श्रीपालोऽष्टमहासिद्धियुक्तो योगी मुक्तिमिव प्रथमपत्नीं मदनसुन्दरीं हृदि स्मरन् मातृचरण नमनार्थमग्रेगच्छति। पथ्यनेकदेशाधिपैर्वरमणिमौक्तिककंचनमातंगतुरंगमादिदानपूर्वकं नम्यमानो मार्गस्थितदेशेषु च विजयप्राप्तिपूर्वं स्वाज्ञां प्रवर्तयन् प्रतिस्थानं बहुवर्द्धमानसैन्यः श्रीपालनृपेन्द्रः क्रमेण मालवदेशं प्राप्तः। तदा दुतमुखादतिमहत्परचक्रागमनं निशम्य भयाक्रांतो मालवेशः प्रजापालभूपस्तूर्णं स्वप्राकारं सज्जं विधाय तृणवारिवस्त्रधान्येन्धनादिसंग्रहं च कृत्वा विविधशस्त्रसुभटानां च सज्जतां चकार, परसैन्य भयाव्याकुलीभूतलोकामुज्जयिनीं पुरीं श्रीपालः स्वसैन्येन वार्द्धि द्वीपमिवपर्यवेष्टयत्। ततः श्रीपालो रजनीप्रथमप्रहरे स्वमातृनमनार्थं हारप्रभावेण स्वगृहं गत्वा स्वमातृपत्न्योर्वार्तालापं श्रोतुं द्वारस्यबहिः स्थितः। तस्मिन्काले

Jun Gun Aaradhak Trust

तन्माता तत्पत्नीं प्राह वत्से परसैन्येनेयं पुरी वेष्टिताऽस्ति तेन लोका भयाक्रान्ता व्याकुलाश्च संजाताः सन्ति विदेशगतस्य मत्पुत्रस्य चाद्यावधि कोऽपि संदेशो नाऽयातस्तस्मादत्र किं भविष्यति तन्न ज्ञायते. तन्निशम्य मदनसुन्दरी प्राह मातः श्रीसिद्धचक्रप्रसादा दावयोः कस्याऽपि भयं नास्ति युयंनिश्चिन्ता भवत पुनर्हे मातरद्य जिनपूजां कुर्वत्या मम कोऽप्यपूर्वानंदः संजातोयोऽधुनावधिहृदि न माति वामलोचनं वामस्तनश्च स्फुरति तेन निश्चयेनाद्य युष्मत्पुत्रमीलनं भविष्यतीत्यहं मन्ये तन्निशम्य सानंदा कमलप्रभा प्राह हे वत्से तव जिह्वायामम्रृतं वर्सात तेन तव वचनं सत्यमेव भविष्यति. तं मातृ पत्न्यो वार्तालापं श्रुत्वा स्वपत्नी धर्मदृढत्वेन सत्यवचनत्वेनच संतुष्टः श्रीपालो मातर्द्वारमुद्- घाटयेति प्रोवाच तदा कमला प्राह वत्से नूनमिदं मम पुत्रस्यैव वचनमस्ति तच्छ्रुत्वा मातःकिं जिन वचनं मिथ्या भवेदिति वदन्ती प्रभूतानन्द रोमांचितांगा मदनसुन्दरी शीघ्रं द्वारमुदघाटय त्तदा श्रीपाल आनन्दमेदुरांस्वांम्बां प्रणम्य विनयनम्रां च स्वपत्नीं प्रेम्णा संभाष्य मातरं स्वस्कंधे संस्थाप्य पत्नीं च स्वहस्ते गृहीत्वा हारप्रभावेण तुर्णं स्वसैन्यमागात्। तत्र स्वाम्बां भद्रासने समुपवेश्य प्रणम्य च

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विनयपरःप्राह मातःपरमोपकारिगुरुदर्शितश्रीसिद्धचक्रप्रभावेण तव प्रसादेन चेदं सर्वं प्राप्तमस्ति तन्निरीक्ष्य तस्याष्टौ पत्न्योऽपि मदनसुन्दरीयुतां स्वश्वश्रूं प्राणमंस्तदाताभ्यामपि सहर्षताः सर्वा अभिनन्दिता स्ततो विद्याधरसुतया तयोःपुरः सर्वोऽपि स्वस्वामिवृत्तान्तः कथितस्तन्निशम्य ते द्वेऽपि सानंदे संजाते ततः श्रीपालस्ताभ्यो नवभ्योऽपि पृथक् पृथग् वर्यवस्त्रालंकारपरिवारेण सहैकमेकं नाटकं दत्वा मदनसुन्दरीं प्राह प्रिये त्वज्जनकं कथमत्राकारयामि तदा सा प्राह स्वामिन्मज्जनकः स्कंधस्थितकुठारोऽत्राकार यितव्यो येन पुनः कोऽपि जिनधर्माशातनां न कुर्यात्सर्वेषां च कर्मस्वरूपज्ञानं भवेत्तन्निशम्य श्रीपालेन तथैव मालवाधीशाय दूतमुखेन ज्ञापितं तदा प्रजापालनरेन्द्रः कोपकंप्रोष्ठारुणलोचनः संजातस्तन्निरीक्ष्य मन्त्रिणः प्रोचुः स्वामिन् स्वाधिकबलवता सह विरोधःपरिणामाऽसुन्दरो यः स्वपुण्येन महान्संजातस्तं सक्रोधोऽपि पुमान् लघुं कर्तुं समर्थो न भवति तस्मात्कोपं त्यक्त्वा यथादेशं कर्तव्यं युक्तं तन्निशम्य विगतकोपःपृथ्वीपःप्रातःकाले स्कंधस्थितकुठारः स्तोकपरिवारयुतः श्रीपालसैन्यं समागात्तदा श्रीपालः स्वप्रधानपुरुषै र्मालवेशं कुठाररहितं कारयित्वा वर्यवस्त्राभूषणकृतसत्कारं च तं स्वसमीपं समानाय्य वर्यासने



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

समुपवेशयत्तस्मिन्नवसरे मदनसुन्दर्या प्रोक्तं तात मदीयकर्मणाऽऽनीतमिमं वरं पश्य येन त्वदीयस्कंधात्कुठारः समुत्तारितस्तन्निशम्य श्रीपालं चोपलक्ष्य हृदि चमत्कृतः प्रजापालः श्रीपालं प्रणम्य प्रोवाच स्वामिन् महाप्रभावभासुरो गुणगरीष्ठस्त्वं मया नोपलक्षितस्तदा श्रीपालःप्राह नैषो मदीयप्रभावःकिन्तु जिनोक्तमार्गस्थितसद्गुरुदर्शितस्य श्री सिद्धचक्रस्य प्रभावोऽस्ति। तत्सर्वमाश्चर्यकरं श्रुत्वा सर्वेऽपि लोकाः सानंदा जाताः सौभाग्यसुन्दरी रूपसुन्दर्यादिपरिवारश्च तत्र समागतो महानंदश्चप्रवृत्तस्तदा श्रीपालेन विनोदार्थं मदनसुन्दर्यै समर्पिताय नाटकसमूहाय नृत्यार्थमाज्ञा दत्ता तच्छ्रुत्वा सर्वेऽपि नर्तक्यो नृत्यार्थमुत्थिताः परमेका मुख्या नर्त्तकी नोत्तिष्ठति ततो बहुप्रयत्नेनोत्थापिता निरुत्साहा सखेदा सा सदुःखमेवं प्राह—स कुत्र मालवोदेशः, कुत्र शंखपुरं, क्व च बब्बरोहाविधिः, क्वैषानर्त्तकी सुरसुन्दरी ॥१॥ ततः क्षर श्रुका सदुःखं रुदन्ती विस्मितचित्तैर्मातृपित्रादिपरिवार विलोक्यमाना सा सुरसुन्दरी स्वमातृकंठे विलग्य मातरमपि रोदयामास तदा तत्पित्रा समाश्वास्य प्रोक्तं वत्से कोऽयंवृत्तान्तो धैर्यं धृत्वा कथय तन्निशम्य साऽवद-तात तदा तादृशीसमृद्धियुताऽहं स्वस्वामिनासह शंखपुरीसमीपं प्राप्तापरं सुमुहूर्ताभावेन युष्मज्जामाता स्तोकपरिवारस्तत्रैव-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

 

स्थितः स्वस्थानसामीप्याद्वयवः सुभटाः स्वं स्वं गृहं गताः निशि महती तस्करधाटी तत्राऽऽगता तांवीक्ष्य भयकातरो मत्स्वामी पलायितस्तदा चौरा मां समृद्धिं च गृहीत्वा नेपालदेशे मूल्येनैकस्मै सार्थपतये ददुः सच सार्थपो बब्बरकुलंगत्वा मूल्येन वेश्यायै ददौ. तया वेश्यया नृत्यादिकर्तव्येष्वहं निपुणा कृता, ततो नाटकप्रयेण महाकालपृथ्वीसेननाटकपेटकेन सहाहं वेश्यातो गृहीता तदग्रेकंचित्कालमहमनृत्यं ततो भूपेन-स्वपुत्री विवाहं कृत्वा स्वजामात्रे श्रीपालाय नवभिर्नाटकवृंदैः सहाहमपि दत्ता ततः प्रभृत्यद्ययावदहं श्रीपालाग्रे विविधैःप्रकारैरनृत्यं। ततोऽत्रागतेन श्रीपालेन नवभ्यः स्वपत्नीभ्यो नृत्यविनोदार्थं विभज्य पृथक् पृथक् नाटकवृन्दं ददतैकेन नाटकवृन्देन सहाहं मदनसुन्दर्यै प्रदत्ताहो कर्मणां विचित्रता. साऽहं मदनसुन्दर्या नर्त्तकी संजाता. चिणाऽद्य स्वकुटुम्बं च वीक्ष्य समुल्लसितदुःखा संजाताऽस्मि। मया प्रागमूर्खत्वेन मदीयं-महत्त्वं मदनसुन्दर्याश्चलघुत्वं वीक्ष्य महागर्वः कृतोऽभूत्स गर्वो मदनसुंदर्याःकिंकरत्वं कारयताकर्मणा हतोऽहो कर्मसामर्थ्यं. धन्येयंकृत पुण्येयं मदनसुन्दरी तज्ज्ञात्वा यस्या निर्मलशीलजिनधर्मकल्पपापसेवनमेतादृशै-रचिन्त्यमाहात्म्यफलैः फलितं। अधन्याऽहमकृतपुण्याऽहं मिथ्यात्वमूढाया यस्याः कुशीलमिथ्याधर्मविषपादप-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सेवनं कुत्सितैर्विषतुल्यफलैः फलितं। कुलधर्मदीपिकाया अस्या दर्शनेनाऽपि जीवा निर्मलत्वं सम्यक्त्वंच लभन्ते. कुलांगारतुल्या मिथ्यात्विन्या ममदर्शनेन तु जीवा मालीन्यं मिथ्यात्वं च लभन्ते. इयंपुण्यवतां-मुख्या. अहंपुनःपापवतां मुख्या. इत्यादि वदन्त्या तया नाटकशतोत्पन्नानंदजित्वर आनंदःसमुत्पादितस्ततः श्रीपालःस्वसेनास्थितमरिदमनकुमारं गवेषणापूर्वकं स्वसमीपंसमानाय्य तस्मैसुरसुन्दरीयुता महतीसमृद्धिर्ददौ सभार्योऽरिदमनश्च सम्यक्त्वरत्नं प्राप्तस्तस्मिन्काले श्रीजिनधर्मस्यमाहात्म्यं सर्वत्रविस्तारं प्राप। अथ श्रीपालः स्वसेवार्थं समागतान्निरोगान् सप्तशतपुरुषान् राणाभिधां पदवींददौ मतिसागरमन्त्रीशं च पूर्ववत् महामात्यपदं दत्वा सर्वराज्यकार्यं समर्पयदन्यांश्च पृथ्वीपान्श्वशुरनृपान् श्यालकान् सुभटांश्च विविधं बहु संमानं ददौ तेऽपिसर्वे विनयनम्राःसन्तः श्रीपालनृपेन्द्रं सेवन्तिस्म। अथान्येद्युः सामंतमन्त्रियुतो मतिसागर-मन्त्री पृथ्वीन्द्रं प्रणम्य विनयनम्रः सन्नुवाचस्वामिन् बालत्वेऽपि राज्ये समुपवेशितं त्वां राज्यादुत्थाप्य दुष्टेनाजितसेनेन राज्यं गृहीतंत्वन्मारणार्थं च बहव उपायाःकृतास्तस्मात्स तव रिपुरेवाऽस्ति सत्यपि सामर्थ्ये यदि रिपुतःस्वंपैत्र्यंराज्यं न गृह्यते तर्हि लोके हास्यभाति. यदि पैत्र्यं राज्यं न गृह्यते तर्ह्यस्यास्तव समृद्ध्या



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अपि किं फलं. यावत्त्वयाऽयंमहारि जितसेनं जित्वा स्वं पैत्र्यं राज्यं न गृहीतं तावत्त्वया किमपिकृतंनास्ति अहमपि तदेवसानंदो भविष्यामि यदात्वां स्वराज्योपविष्टं द्रक्ष्यामि. तन्निशम्य पृथ्वीन्द्रःप्राह सचिव त्वया-सत्यं प्रोक्तं परं सामदानभेददंडाभिधश्चतुर्भिरुपायैःकार्यं करणीयं यदिसाम्नैव कार्यं सिद्ध्यति तर्हि दंडस्यकिं प्रयोजनं. यदि कुशूलोदुग्धंदद्यात्तर्हि महिष्याः किं प्रयोजनमस्ति ? तदाऽमात्येन्द्रः प्राहाऽहो स्वामिंस्तव वयोऽधिका प्रज्ञा, वारिध्यधिकं गांभीर्यं क्षमाधिका च क्षमा ॥ यदि सामाद्युपायेनकार्यं कर्तव्यमस्ति तर्ह्यु पायचतुष्कनिपुणोऽयं चतुर्मुखोदूतः प्रेषणीयस्तन्निशम्य पृथ्वीन्द्रेण स दूतः प्रेषितस्ततः स दूतश्चंपांगत्वाऽजित-सेनंप्राह हे पृथ्वीश श्रीपालोऽधुना बालोऽस्ति तस्माद्राज्यभारवहनाऽक्षम इति मत्वा त्वया तदा राज्यभारं स्वस्कंधे संस्थाप्य श्रीपालः सर्वकलाध्ययनार्थमन्यदेशेषु प्रेषित आसीत्स श्रीपालोऽधीतसर्वकला-कलापोऽसमानबलो भूपचक्रसेव्यमानपद्वारिजश्चतुरंगसैन्ययुतस्त्वदीयस्कंधस्थितं भारमुत्तारयितुंसमायाति तस्मात्त्वया स्वस्कंधस्थितराज्यभारः श्रीपालस्कंधे स्वयं संस्थाप्ये ॥ तदेव योग्यं कर्तव्यमस्ति यतोबुद्धि-मन्तो जीर्णस्तम्भस्थितो भारो नवेस्तंभे स्थापयन्ति. तद् दूतोक्तं यदा जितसेनस्य हृदि नरुचितं तदा दूतः

Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पुनःप्राह पार्थिव तस्य श्रीपालस्य सेवार्थमनेके पार्थिवाः समागताः सन्ति परं यावत्त्वंस्वकीयो भूत्वा मील-नार्थमपिनागतस्तावत् श्रीपालस्यहृद्यानंदोना ऽस्त्यन्ये ऽप्यत्र विषये कुटुम्बविरोधं तर्कयन्ति कुलविरोधश्च कुलोच्छेदनेशत्रूणां परमसहायकोऽस्ति स तु न योग्यो यदि च विरोध एव तव प्रियोऽस्ति तर्हि स्वशक्ति-रपि विचारणीया. भास्करसमःस क्क, खद्योतसमस्त्वं च क्क, चिन्तारत्नसमःस क्क, काचशकलसमस्त्वं च क्क, सागरसमःस क्क, पल्वलसमस्त्वं च क्व, यदित्वं स्वजीविते रुष्टो नाऽभवस्तर्हि राजाधिराजस्य श्रीश्रीपालस्य पदपंकजौ सेवस्व. यदि च राज्येनगर्विष्टोभूत्वा तस्याऽवगणनां करोषि तर्हि युद्धसज्जो भव. तस्य सैन्य-समुद्रे तव सैन्यं स्तोकसक्तुतुल्यं भविष्यति तस्मा-त्वांहितं वच्मि महता सह विरोधः परिणामाऽसुन्दर स्तन्निशम्य कोपकंप्रोष्ठोऽरुणलोचनो भूपः प्राह भो चतुर्मुख त्वं दूतत्वादवध्योऽसि तवस्वामी बालत्वेन तदा मयामुक्तस्तेनत्वयाऽहं निर्बलःकथितः स च त्वया स्वकीयःकथितःपरं स मम रिपुरेवाऽस्ति. अहंमम जीविते रुष्टो नाऽस्मि किंतु योमां सुप्तपंचाननमिवोत्थापयति तस्योपर्यैव कृतान्तः कुपितोऽस्ति. येषां सैन्यं तत्सैन्य वारिधौ स्तोकसक्तुतुल्यं भवे-तेऽन्येऽहंतु तत्सैन्यवारिधिशोषणे वडवाग्निरस्मि त्वं तवस्वामिनं युद्धार्थं तूर्णं

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

प्रेषयैषे ऽहं तद्वधार्थं शीघ्रं युद्धभूमिमागच्छामि. तच्छ्रुत्वा दूतस्त्वरितं श्रीपालसमीपं समागत्य सर्वं वृत्तान्तम- कथयत्तदा श्रीपालोऽपि महासैन्यं मेलयित्वा तूर्णं चंपापरिसरं प्राप्तः स सैन्योऽजितसेनोऽपि तत्रायातो द्वाभ्यां सैन्याभ्यामपि युद्धभूमी शोधिता जयस्तंभौ चारोपितौ शस्त्रार्चनं कृतं सुभटैः स्वदेहो वर्यचन्दनर- सैर्विलिप्तो वर्यपुष्पग्रथितमुकुटवीरवलयचामरातपत्रादिशोभिताश्च ते सुभटा महावीरा ज्ञायन्ते स्म ऽचारणाः सुभटप्रशंसां कुर्वन्ति स्म वीराश्च गजगजारवं सिंहनादं च चक्रुर्युद्धतूर्यरवैश्च दिशः पूरिता गजगर्जितैर्हयहेषारवैः स्यन्दनचित्कारैश्च तत्र महांस्तुमुलः प्रवृत्तः। तदा काचिन्माता पितुरग्रे स्वतनयं प्राह वत्स युद्धे त्वया तथा योद्धव्यं यथा त्वत्पितु र्हृदि प्रसन्नो भवेत्। काचिच्चैवमुवाच वत्स त्वया तथा युद्धं कार्यं यथा वीरपुत्री वीर- वल्लभाऽहं वीरजननी भवेयं। काचित्स्वपतिं प्राह प्राणेश युद्धेऽहं न स्मर्तव्याऽहं तत्र पृष्ठगामिन्येवाऽस्मि। अन्या च हास्येन स्वकान्तं जगाद स्वामिन्मदीयकटाक्षशरैर्विद्धस्त्वं यदि धैर्यं मुंचसि तर्हि वर्षच्छस्त्रवर्षे युद्धे कथं धैर्यवान् भविष्यसीत्यादिवचनैर्द्विगुणोत्साहितान्वीरान् द्रष्टुमिव सूर्य उदयाचलमूर्ध्नि समागात्तदा वीशः प्रागनधीतामपि याचनामाद्यशस्त्रप्रहारार्थं चक्रुर्वीरं युद्धं च प्रवृत्तं तत्र परस्परमसिकुंतशरदंडादिशस्त्रैर्वीरं



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

युद्धं कुर्वत्सु कस्यचिच्छत्रच्छिन्नं वियति प्रोच्छलितं मस्तकं भास्करस्य राहुशंकां चकारेव ददृशे. कश्चिच्च वीरेणगगनेप्रोच्छालितः सुभटः सदेहोऽप्सरसोमिलनार्थं गच्छन्निवददृशे. केचिच्च छिन्नमस्तकाः शस्त्रहस्ताः प्रनृत्यन्तो युद्धं च कुर्वन्तः सुभटाः साक्षाद्वीररसवद् ददृशिरे. तस्मिन्भयंकरे युध्धे बहुस्यन्दनाश्चूर्णिता बहुकरिहयसुभटानां च संहारः संजातो रुधिरस्त्रोतस्वीनी च चलिता. प्रतिस्थलं पतितै मृतसुभटगजाश्वकलेवरैस्तेषांच्छिन्नावयवैश्चसा युद्धभूमी भयंकराःसंजाता. एवं भीषणं युध्धं कुर्वतोस्तयोः सैन्ययोर्मध्ये श्रीपालसैन्येन स्वसैन्यं भग्नं वीक्ष्य रोषारुणोऽजितसेनः स्वसैन्यं प्रोत्साह्य साक्षाद्यमवत्ससैन्यस्य श्रीपालस्य वधार्थमुत्थितःसन् श्रीपाल सैन्यं संमरन्नस्ति तदा सप्तशतराणकस्तं परिवेष्यप्रोक्तं भो नरेन्द्र मानं मुक्त्वाऽस्माभिः सह त्वमपि श्रीपालसेवांकुरुथ्वाऽद्यापि किमपि ते गतंनास्ति. तथा कृते सर्वमपि सुष्ठु भविष्यति कर्णतप्तत्रपुतुल्यं तद्वचनं श्रुत्वाऽतिशयकोपव्याप्तः सः तैः सह दारुणं युध्धं चकार तदा तैरवसरं लब्ध्वा गजेन्द्रात्पातयित्वा गाढबन्धनैर्बध्वा स श्रीपालसमीपं समानीतः श्रीपालश्च तं तूर्णं मुक्तबन्धनंकृत्वेति प्राह तात त्वं स्वमनसि स्तोकमपिखेदंमाकुरु पूर्ववत्स्वंराज्यं सुखेन भुक्ष्वाऽन्यदपि

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्वेष्टमधिकं किमपि गृहाण तन्निशम्याऽजितसेनाऽचिन्तयदहो मया प्राग् दूतोक्तं यन्न स्वीकृतं तत्सुष्ठुनकृतं. क्वाऽयं बालोऽपि परोपकारधर्मपरायणः क्व चाऽहं वृद्धोऽपि पापपरद्रोहपरः हा मया गोत्रराज्यबालद्रोहश्च क्रमेण कीर्तिनीतिसुगतिनाशको भवतीत्यविचार्य. तत्सर्वं कृतं हा मदर्थं नरकादन्यत्स्थानं नास्त्येव महापापिनो मम कथं शुद्धिर्भविताऽथवाऽसृतमनेन विकल्पेन सर्वपापहरीं सकलदुःखमूलकर्मोच्छेदिनीं सर्वेष्टसुखदानकल्पवल्लीं प्रव्रज्यां स्वीकुर्वेऽन्यथापापशुद्धिर्नास्त्येवेत्यादि शुभभावपराय तस्मै कर्मणा विवरं दत्तं तेन जातिस्मरणं प्राप्य चारित्रं स्वीकृतं शासनदेवीदत्तसाधुवेशश्चांगीकृतस्तदा तं स्वीकृतचारित्रं वीक्ष्य बहुभक्तियुतः श्रीपालः सपरिवारस्तं मुनीन्द्रं प्रणम्यैवं स्तुतिं कर्तुं लग्नः हे महामुनीश्वर तुभ्यं मे कोटिशोनमोऽस्तु धन्यस्त्वं कृतपुण्यस्त्वं येन त्वया चिन्तामणिरत्नाधिकं चारित्ररत्नं लब्ध्वाऽनुत्तरं लभ्यं लब्धमतिशयदुर्जयाश्च क्रोधमानमायालोभशत्रवः क्रमेण क्षमामृदुत्वार्जवनिरीहत्वशस्त्रेण निर्जितास्त्रिभुवनजयिनौ च काममोहमल्लावपि पातितावतो देवैरप्यजेयांतरंगशत्रुजयिन्महामुनीन्द्र तुभ्यं मे पुनः पुनर्नमोऽस्तु हे पूज्य त्वं प्रागपि तात भ्रातृत्वान्ममपूज्य एवासीदधुना तु स्वीकृतचारित्रस्त्वं त्रिभुवनपूज्यः संजात इत्यादिस्तुतिंविधाय भक्त्या



P.P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

च तं प्रणम्य तत्सुतं तद्राज्येऽस्थापयत् । मुनीश्वरोऽन्यत्र विजहार । श्रीपालभूपेन्द्रश्च तोरणपताकादिकृत-विशेषशोभां चंपापुरीं महामहेन प्राविशत्ततः सर्वैः पृथ्वीपैर्मौलित्वामहामहेन तस्य राज्याभिषेकः कृतो मदनसुन्दर्याश्च मुख्यपट्टराज्ञीत्वाभिषेकोऽन्यासांचाऽष्टानां लघुपट्टराज्ञीत्वाभिषेकः कृतः। ततः श्रीपालनृपेन्द्रो-मतिसागरमन्त्रिणे धवलमित्रत्रिकाय च महामात्यपदं ददौ कोशांबीपुरीतश्च धवलपुत्रं विमलमाहूय तस्मै धवलस्य सर्वधनसमर्पणपूर्वं श्रेष्ठिपदं ददौ. अन्भ्योऽपि सर्वेभ्यो यथायोग्यं संमानंदत्त्वाऽर्हच्चैत्येष्वष्टाह्निकमहामहं सिद्धचक्रार्चनं चाऽकारयत्. प्रोत्तुंगजिनप्रासादांश्चकारयित्वाऽमार्युद्घोषणामकारयत्. अभयसुपात्रानुकंपादानपरःशीलतपोभावयुतश्च स सुखेन धर्मं राज्यं च पालयन्नस्ति ।

इतश्च विशुद्धचारित्रः समुत्पन्नावधिज्ञानोऽजितसेनराजर्षिस्तत्रसमागात्. तद्गुर्वागमनं श्रुत्वाऽऽनंदरोमांचितांगः श्रीपालः सपरिवारस्तत्रसमागत्य प्रकृष्टभक्त्या मुनीन्द्रं प्रणम्य योग्यस्थाने समुपविष्टस्तदागुरुरेवं धर्मोपदेशमदात्—भो भव्यजीवा अस्मिन् संसारे सर्वेऽपि जीवाः स्वकृतकर्मणैव सुखदुःखं प्राप्नुवन्ति कोऽप्यन्यः सुखदुःखस्य दाता नास्ति. तत्त्वतश्च सांसारिकं सुखमपि विनश्वरत्वपरिणामाऽसुन्दरत्वाभ्यां दुःख-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मेवास्ति तात्त्विकमक्षयसुखं तु मोक्षसुखमेवाऽस्ति तच्चकर्मोन्मूलनं विना न प्राप्यते कर्मोन्मूलनं च सम्यग्ज्ञानयुतचारित्रस्य संपूर्णाऽऽराधनं विना न जायते तदाराधनं च दशभिर्दृष्टान्तैर्दुर्लभतममनुष्यत्वं प्राप्यैव संजायते मानुष्यमप्यार्यक्षेत्रे जिनधर्मवासितसुकुले प्राप्यते तदैवेष्टसिद्धिर्भवति यतोऽनार्यक्षेत्रेषु तु पापकर्मरता अज्ञातजिनधर्माभिधाना मनुष्याः प्रायेण वसन्ति. आर्यक्षेत्रेष्वपि शौनिकव्याधधीवरादीनां पापकर्मप्रसक्तानां कुकुलेषु मानुष्यं प्राप्य किमात्मश्रेयो भवति? तथैवमिथ्यात्ववासितकुलेष्वपि श्रेयो न भवति. यदि कथंचित्पुण्ययोगेन जिनधर्मवासितसुकुले मानुष्यं प्राप्तं तथाऽपि सद्गुरुसंयोगोऽतिदुर्लभो यतः सर्वत्र सुगुरवो न प्राप्यन्ते यदि सुगुरुसंयोगोऽपि केन चित्पुण्येन संजातस्तथापि तस्य दर्शनं तन्मुखात्सुशास्त्रश्रवणं सुशास्त्रवचनंश्रद्धानं चाऽऽलस्यकुसंगतिविषयकषायमिथ्यात्वादिभिर्व्यासचित्तानामतिदुर्लभतममस्ति यदि कथंचिदपि पुण्ययोगेन तत्सर्वमपि प्राप्यते ततः सम्यक्चारित्रगृहणाराधनं क्रियते तदैवकर्मोन्मूलनपूर्वकं मोक्षसुखं प्राप्यते सम्यक् चारित्रधर्मस्याराधनं च क्षमामार्दवार्जवमुक्तितपःसंयमसत्यशौचाकिंचनत्वब्रह्मचर्यात्मकदशविधयतिधर्माराधनेन भवतीत्यादिकं गुरूक्तं धर्मोपदेशं श्रुत्वा श्रीपालः प्राहः—

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हे ज्ञानसमुद्र भगवन् केन कर्मणाऽहं शिशुत्वे कुष्ठरोगी संजातः, पुनर्नीरोगो जातः, समुद्रे पतितो निर्विघ्नं च तस्मान्निर्गतः, प्रतिस्थानं महर्द्धिं प्राप्तो बालत्वे च गतराज्यसमृद्धिकः संजातो, मातगत्व-कलंकं प्राप्तो निष्कलङ्कश्च संजात इत्यादिकं मत्कर्मस्वरूपं प्रसादं कृत्वा कथय. तन्निशम्य मुनीन्द्रः प्राह पृथ्वीप कर्मस्वरूपज्ञानार्थं तव पूर्वभवं श्रृणु–जम्बूद्वीपभरतक्षेत्रे हिरण्यपुराभिधपुरे मृगयाऽऽसक्तः श्रीकान्त-भिधः पृथ्वीपोभूत्तस्य जिनमतनिपुणाशुद्धसम्यक्त्वधरानिर्मलशीला श्रीमतीनाम राज्यासीत्. साराज्ञीमृगया सक्तं पृथ्वीपं प्रति सदैव कथयति स्वामिन्नरकदुःखप्रदं जीववधव्यसनं तव न युज्यते. निरपराधा नश्यन्त-स्तृणभक्षका अशरणा हरिणादयः प्राणिनस्तीक्ष्णशस्त्रहस्तैरश्वारूढैर्युष्माभिर्यद्धन्यन्ते तदयं किं क्षत्रियाचारो-ऽस्ति ? इयं कीदृशी युष्माकं नीतिः? यदुक्तम्–रसातलं या तु यदत्रपौरुषं, कुनीतिरेषाऽशरणोह्यदोषवान् ॥ विहन्यते यद्बलिनाऽपि दुर्बलो, हहा महाकष्टमराजकं जगत् ॥ १ ॥ वैरिणोऽपि हि मुच्यन्ते, प्राणान्ते तृणभक्षणात् ॥ तृणाहाराः सदैवैते, हन्यन्ते पशवः कथम् ॥ २ ॥ हे स्वामिन् यदि स्वसुखार्थं जीवपीडाकरं कर्तव्यं क्रियते तर्हि सुखं तु सुखप्रदानादेवलभ्यं. यदुक्तं–सर्वाणि भूतानि सुखे रतानि, सर्वाणि दुःखस्य



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

समुद्विजन्ति ॥ तस्मात्सुखार्थी सुखमेवदत्ते, सुखप्रदाता लभते सुखानि ॥ ३ ॥ हिंसा विघ्नाय जायेत, विघ्नशान्त्यै कृताऽपि हि ॥ कुलाचारधियाऽप्येषा कृता कुलविनाशिनी ॥ ४ ॥

इत्यादिराज्ञीबहूपदेशैरप्यप्रबुद्धोभूपोऽन्यदा क्रूरस्वभावैः सप्तशतजनैः सह मृगयार्थमेकस्मिन्नरण्ये ययौ तत्र रजोहरणयुतमेकं मुनीन्द्रं निरीक्ष्य पृथ्वीपोऽवोचद्भो भटा अयं कोऽपि चामरधारी कुष्ठी दृश्यते, तन्निशम्य तैर्दुष्टैरप्येष कुष्ट्येवेति प्रोच्य स क्षमानिधिर्यष्टिमुष्टिलोष्टुभिः पीडितस्तदापृथ्वीपे हास्यरसो मुनीन्द्रे च शान्तरसः समुत्पन्नोऽहो पापिष्ठानां पापवृत्तिः परिगतजिनधर्माणां च सुशक्तानामपि निरुपमा क्षमा. अथ विधत्तसाधूपसर्गाः पुण्यहीनाः पापमतयस्ते बहुहरिणसमूहान् हत्वा सनृपाः स्वनगरं समाययुः । अथैकदा भूपो मृगयार्थं गच्छन्नेकं हरिणं वीक्ष्य सेनां मुक्त्वैकाकी तत्पृष्ठे धावितस्ततः शीघ्रगतौ हरिणे नदीतटवनवृक्षसमूहेऽदृश्यतां गते विलक्षेण भ्रमता नृपेण नदीतटे ध्यानस्थ एको मुनिवरो वीक्षितस्ततः प्रियकुतुहलेनाऽविवेकिना पापमतिना तेन स मुनीन्द्रः स्रोतस्विन्यां क्षिप्तः पुनर्मुनेः शोकाकुलतां वीक्ष्य संजातकृपेण तेन सद्भावेन निम्नगातो निष्काश्य बहिर्मुक्तोऽहो प्राणिनां भावपरावर्तनं । ततःस्वगृहायातेन

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

क्ष्मापेण स्वभार्याग्रे स मुनिवृत्तान्तः कथितः। तन्निशम्य संजातदुःखा ज्ञाततत्त्वा सा राज्ञी प्रोवाच हे स्वामिन्नन्येषामपि प्राणिनां पीडनं कटुफलदं मुनिवराणां पीडनं त्वतिशयकटुफलदं भवति. यदुक्तं–विराधितो-मुनिर्हास्यादपि दुःखौघदायकः॥ किं पुनर्मत्सरावेशान्नरकारंभकारिणः॥ १॥ एकजन्मकृतं पुण्यं, प्रयातियतिकोपनात्॥ यतिघाताच्चुत्रासःस्या–त्सप्तम्यां नरकावनौ॥२॥ दुःखदौर्गत्यदुर्योनि–दौर्भाग्यादि-फलैर्घनैः॥ ऋषिहत्यामहावल्ली, परत्रेह फलत्यपि॥ ३॥ इत्यादिस्वकान्तोक्तमाकर्ण्य भूपालोऽवददतः पर-मेतादृशमकार्यं न करिष्ये. ततः केषुचिद्दिवसेषु गतेषु कदाचिद्गवाक्षोपविष्टेन विस्मृतस्वपत्नीशिक्षेण पृथ्वीपेन नगर्यामाहारार्थं भ्रमन्तमेकं मुनिवरं वीक्ष्य स्वदुष्टपुरुषान् प्रत्येवं कथितं मदीयनगरं मलिनं कुर्व-न्तमेतं मातंगं कंठे गृहीत्वा नगराद्बहिर्निष्कासयत. तदाकर्ण्य-तैर्दुष्टनरैस्तथैव गले गृहीत्वा नगरान्निष्कास्य-मानो मुनिः श्रीमत्या वीक्षितस्ततस्तेन वृत्तान्तेन क्रुद्धया राज्ञ्या परुषशब्दैर्निर्भर्त्सितः क्ष्मापो लज्जितः सन् प्राह प्रिय एतं ममाऽपराधं क्षमस्व पुनरीदृशं नैव करिष्यामीति प्रोच्य राज्ञीशिक्षासंजातपश्चात्तापो भूपस्तंमुनिवरं समाहूय वंदनपूजनसत्कारपूर्वकं क्षमयामास. तदा श्रीमत्या प्रोक्तं हे भगवन्नज्ञानतः पृथ्वीपेन मुनिवरपीडनादिकं



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नरकाद्यसह्यदुःखप्रदं पापकर्म समुपार्जितमस्ति तत्कर्मनाशोपायं कृपां विधाय कथय. तन्निशम्य वाचंयमो-
जगाद. भद्रेऽनेन तव भर्त्रा प्रभूताऽसह्यदुःखप्रदं मुनिपीडनजीववधादिकं सुबहुपापं कृतमस्ति यतोऽन्येषामपि
प्राणिनां पीडनं बहुदुःखदं भवति गुणिपीडनं तु सकलगुणनाशपूर्वकमतिशयासह्यदुःखप्रदं भवत्येव. तथाऽपि
कृतबहुदुष्कृतो जीवो दुष्कृतपश्चात्तापपूर्वकं प्रवर्द्धमानशुभभावेन यदि पूज्याऽर्हदादिनवपदसिद्धं श्रीसिद्धचक्रं
सम्यगाराधयेत्तर्हि सकलदुष्कर्मनाशो भवेत्। भूपस्याऽपि श्रीसिद्धचक्राराधनेन दुष्कर्मनाशो भविष्यति.
ततो मुनिस्तदाराधनविधिं दर्शयित्वा गतः। अथ श्रीमत्या सह धरापेन परमभक्त्या विधिना श्रीसिद्धचक्रा-
राधनं कृत्वोद्यापनं विहितमुद्यापनकालेऽष्टभिः श्रीमतीवयस्याभिस्तपउद्यापनाऽनुमोदना कृता तैः शतशत-
पुरुषैरपि भूपं धर्मकार्यरक्तं वीक्ष्य तस्य धर्मकार्यप्रशंसा कृता। अथान्यदाश्रीकान्तनृपाज्ञया ते सप्तशतनराः
सिंहनृपस्य ग्रामं लुंटित्वा धेनुधान्यधनादिकं च गृहीत्वा यावत्पश्चाद्वलितास्तावद्‌ज्ञातवृत्तान्तेन सबहुसैन्येन
सिंहनृपेण तत्र समागत्य युद्धं च कृत्वा हतास्ततस्ते सर्वेऽपि मृत्वा क्षत्रियकुमाराः संजाताः। शिशुत्वेऽपि ते
मुनिकुष्ठिकथनपीडनादिकृतदुष्कर्मोदयात्कुष्ठिनः संजातास्ततो धर्मप्रशंसाऽर्जितसत्कर्मोदयाच्चगतरोगाराणकाः



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

संजाताः । श्रीकान्तनृपश्च मृत्वा पुण्योदयेन त्वं संजातः । श्रीमतीचैषा पुण्यशालिनी तवाऽग्रमहिषी मदनासुन्दरी जाता. परभवेऽप्येषा यथा तव हितरताऽऽसीदिह भवेऽपि तथैव त्वद्धितरता तत्त्वज्ञा धर्मपराऽस्ति त्वया प्रागिवाऽधुनाऽप्यस्या वचसैव सिद्धचक्रं समाराधितं सुखं च प्राप्तं, मुनितिरस्कारणं कुष्ठिमातंगकथनजलपातनार्जिताशुभकर्मोदयात्त्वया कुष्ठित्वं मातंगत्वं समुद्रपतनं च प्राप्तं श्रीसिद्धचक्राराधनाद्यनुमोदनाच्च दुःखनाशपूर्वकं प्रतिस्थानं महती समृद्धी राज्यादिकं च प्राप्तं श्रीसिद्धचक्राराधनानुमोदनाच्च श्रीमतीसख्यस्तव लघुपट्टमहिष्योऽभवन्नेतासु तवाष्टम्या राज्या प्राग्भवे स्वसपत्नीं प्रति "त्वां सर्पो दशतु" इति कथितमासीत्तेनेहभवे सा सर्पेण दष्टा. यश्च सिंहभूपः स प्रहारजर्जरितः सन् दीक्षया सह मासिकानशनं गृहीत्वा कालं च कृत्वाऽहमजितसेनः संजातः । त्वया मम ग्रामो लुंठितस्ततेन कर्मणा मया तव राज्यं गृहीतं. मया समरातगुहत्या युगबद्धनास्तेन कर्मणा तैर्मां गाढबन्धनबद्धं कृत्वा त्वत्पुरः मुक्तः, मया प्राक् चारित्रं गृहीतं तेन शुभकर्मणा मम मरणं न संजातं किन्तु मया चरणं प्राप्तं ततः शुभभावेनोत्पन्नावधिज्ञानोऽहं क्रमेणात्राऽऽगतोऽस्मि. हे श्रीपाल येन प्राणिना यादृशं शुभाशुभकर्मकृतं तेन तादृशं फलं प्राप्यते तन्मुनिमोक्तं निशम्य "अहो भवनाटकं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कीदृशं विचित्रमस्ति" इति च विचिन्त्यातिविनयनम्रेण श्रीपालपृथ्वीपेन प्रोक्तं भगवन्नहं सर्वविरतिपालने समर्थो नाऽस्मि तस्मात्किंचिद्मद्योग्यं धर्मकृत्यं कथय. तच्छ्रुत्वा मुनीन्द्रः प्राह नरेन्द्र ? भोगकर्मोदयादिहभवे तव चारित्रप्राप्तिर्नास्ति. किन्तु श्रीसिद्धचक्रध्यानाराधनलीनः संस्त्वं नवमे स्वर्गे यास्यति. ततो मनुष्यदेवसौख्यान्यनुभवन्नवमेभवे निश्चयेन मोक्षं गमिष्यसि तन्निशम्य भूपतिः सानंदः स्वगृहं समागत्य स्वपत्नीभिः सह श्री सिद्धचक्राराधनालीनो बभूव. वाचंयमश्चाऽन्यत्र विजहार.

अथाऽन्यदा तत्वज्ञा मदनसुन्दरी स्वपतिं प्रति प्राह स्वामिन् ! प्राक् स्तोकविभवेन त्वया श्रीसिद्धचक्रतपउद्यापनं संक्षेपतः कृतमधुनातु महती राजसमृद्धिरस्ति तस्मात् स्वविभवतुल्यं विस्तरेण श्रीसिद्धचक्रतपउद्यापनं कर्तुं योग्यं. तन्निशम्य प्रवर्द्धमानभावभक्तिना नृपेण विस्तरेण श्रीसिद्धचकाराधनं समारब्धं. तत्र तेन पृथ्वीपेन नव सार्हत्प्रतिमाञ्, जिनप्रासादाञ् जीर्णोद्धारांश्च कारयित्वा विविधपूजाभक्तिकरणेन श्रीअर्हत्पदाराधनं कृतं। सिद्धानां विविधामूर्तीः कारयित्वा तेषां प्रणामपूजनध्यानलीनतया श्री सिद्धपदाराधनं कृतं। सूरिवराणां भक्तिबहुमानवंदनाशनवसनादिदानविनयवैयावृत्यादिकरणेन

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्रीआचार्यपदाराधनंकृतं। अध्ययनाध्यापनसाहाय्यकरणस्थानाशनवस्त्रादिदानवंदनविनयवैयावृत्त्यादिकरणेन श्री उपाध्यायपदाराधनं कृतं। अभिगमनवंदनाशनवस्त्रौषधादिदानविनयवैयावृत्त्यादि करणेन श्रीसाधु पदाराधनंकृतं। तीर्थरथजलयात्राजिनधर्मप्रचारप्रभावनादिकरणेन श्रीदर्शन पदाराधनं कृतं। सर्वज्ञोक्त-शास्त्रलेखनरक्षणार्चनपठनपाठनप्रचारादिना श्रीज्ञानपदाराधनंकृतं। विविध नियमव्रतपालनयतिधर्मानुराग-विरतिग्रहणेच्छुसाहाय्यकरणचारित्रिसेवनादिलीनतया श्रीचारित्रपदाराधनंकृतं। यथाशक्ति संसारसुख-वांच्छा हीनद्वादशप्रकारतपः करणेन श्रीतपःपदाराधनं च कृतं। एवंप्रवर्द्धमानभक्तिः स द्रव्यभावाभ्यां प्रत्यहमपि श्रीसिद्धचक्रं पूजयन् सार्द्धचत्वारि वर्षाण्यगमयत्ततः पूर्णे तपसि महाविस्तरेण जिनशासन-माहात्म्यविवर्द्धकं भुरिभव्यजीवधर्मप्रापकमुद्यापनमकरोत्. उद्यापनं यत्तपसः समर्थने, तच्चैत्यमौलौ कल-शाधिरोपणम्; फलोपरोपोऽक्षतपात्रमस्तके, ताम्बुलदानं कृत भोजनोपरि ॥१॥ ततो महाविस्तरेण स्नात्रमहामहं महापूजां चाऽकारयत्। मंगलावसरे श्रीसंघेन श्रीपालमदनसुदर्योस्तिलके कृत्वा माले परिधापिते ततः सभार्यः श्रीपालः श्रीसिद्धचक्रस्यैवं भावस्तवनांचकार.



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यस्मिन्मध्यस्थितोऽर्हंश्च, दिक्षुसिद्धादयः स्थिताः। विदिक्षुदर्शनाद्यास्तद्, यन्त्रंददातुवांछितम् ॥१॥

इतिपठित्वा शक्रस्तयं च प्रोच्य पुनर्नवपदानामेयंस्तुतिं चकार. ।

उत्पाद्यकेवलज्ञानं, तीर्थंप्रवर्त्तितंहियैः । उपकारिशिरोरत्नै-स्ताञ्जिनान् प्रणमाम्यहम् ॥२॥

सिद्धानन्तचतुष्केभ्यः, सिद्धेभ्योऽस्तुनमोनमः। पंचाचारप्रसक्तेभ्यः, सूरिभ्योऽस्तुनमोनमः ॥३॥

सूत्रार्थमग्नचित्तेभ्यः, पाठकेभ्योऽस्तुमेनमः। क्षान्त्यादिगुणयुक्तेभ्यः, साधुभ्योऽस्तुनमोनमः ॥४॥

शमायिगुणलक्ष्याय, सम्यक्त्वायनमोनमः। अज्ञान तिमिशर्काय, सद् ज्ञानाय नमोनमः ॥५॥

सदाचारस्वरूपाय, चारित्रायनमोनमः। कर्माष्टकेभसिंहाय, तपसेमे नमो नमः ॥६॥

इत्यादि स्तुतिभिः श्रीसिद्धचक्र स्तवनां विधाय श्री सद्गुरु समीपं समागत्य तेषांनवांग पूजन, वंदन पूर्वकं वर्य वस्त्रपात्रादि दानेन वर्यां भक्तिं चकार। ततो विविध मांगल्यतूर्यशब्दपूर्वकं महोत्सवं प्रवर्त्त्यमहतीं शासन प्रभावनां कृत्वा श्रीसंघस्य पूजनंच विधाय वर्यं साधर्मिक वात्सल्यमकरो त्! एवं श्री श्रीपालभूपतिः स्वपट्टदेवीभिरन्यैश्चभूरिजनैः सह श्रीसिद्धचक्रस्याराधनां करोतिस्म। जिनप्रासादैः पृथ्वींसालंकारांचकार।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भूरिलोकाञ्जिनधर्माराधनपरांश्च चकार। श्रीपालपृथ्वीपस्य नवभ्यःपट्टराज्ञीभ्योनिरुपमरूपगुणाढया नव-
तनुजाःसंजाताः तस्यभूपस्य नवसहस्त्राणिरथा, नवसहस्त्राणिहस्तिनो, नवलक्षाणिवर्याऽश्वा, नवकोटयश्चपदा-
तयोऽभवन्। अपरिमेय समृद्धिकस्य विविधभोगोपभोगसुखंभुंजतो वर्यनीतिपूर्वकं राज्यं पालयतो
धर्मातिरक्तस्य तस्यश्रीश्रीपालस्ययदानववर्षशतानिव्यतीतानितदासभूपालःस्वकीयं ज्येष्ठपुत्रं त्रिभूवनपालं-
राज्येसंस्थाप्य बहुसमृद्धिं सप्तक्षेत्रेपु चदत्वा श्रीसिद्धचक्रलीनः श्रीनवपदस्तवनां करोतिस्मः। श्रीनवपद-
स्तवनां कुर्वन् तथाश्रीनवपदेषुलीनचितोऽभवद् यथा स्वात्मानं नवपदमयमपश्यत्. तस्मिन्नवसरएवाऽक-
स्मादायुषः क्षयात्सश्रीपालनरेंद्रो नवमेदेवलोके सुरवरः संजातः तस्यमातापत्न्यश्चाऽपि स्वायुःक्षयेण
तत्रैवस्वर्गेसुरवराः संजाताः। ततश्च्युत्वा ते सर्वेऽपिमनुष्याभविष्यन्ति, ततोदेवभवान्तरिता नरभवान्प्राप्य
नवमेभवे मनुष्यत्वंप्राप्य कर्मक्षयं कृत्वातेसर्वेऽपि सिद्धिं यास्यन्ति. ॥

एवं श्रीगोतमगणधरमुखात् श्रीसिद्धचक्र माहात्म्यदर्शकं महाश्चर्योत्पादकं श्रीपालचरित्रंश्रुत्वा चम-
त्कृतेनश्रेणिकपृथ्वीपेनप्रोक्तं भगवन्नेतानिनवपदानि महाप्रभाववन्ति सन्तिः? तदा गणधरःप्रोवाच

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्थितानीत्यर्थः) तेऽपिच जीवानवपदेषु स्थिताः सन्तिः। प्रणष्टाऽष्टादश दोषः सर्वभावज्ञोनरसुरेन्द्रैः सेव्यमानोऽष्टमहाप्रातिहार्य युक्तो य आत्मा मह्यांविहरति स एवाऽर्हन् प्रोच्यते। सिद्धानन्तचतुष्को रूपातीत स्वभावोऽष्टकर्म विमुक्तो य आत्मा सएवसिद्धःप्रोच्यते। पंचाचार पालकप्रचारकःसूरिमहामन्त्रध्यानलीनचित्तोजिनशासनप्रासादस्तंभतुल्यो य आत्मा स एव आचार्यउच्यते। महाप्राणध्यानचिन्तित द्वादशांग सूत्रार्थोभयरहस्यो निरन्तराध्ययनाध्यापनतत्परो य आत्मा सएवोपाध्यायः कथ्यते। जिनोक्तदशविधयतिधर्मपालनपरा जितेन्द्रिया सम्यग् ज्ञानदर्शन चारित्र धारका ये केऽपितएव साधवःस्युः। मोह क्षयोपशमेण परमशुभपरिणाममयः शमसंवेगादि लक्षण लक्ष्यो य आत्मा सएवदर्शनमुच्यते. ज्ञानावरणीयकर्मक्षयोपशमसमुत्पन्नयथास्थिततत्त्वाऽवबोधवान् य आत्मा सएव ज्ञानमस्ति। कषाय नोकषाय रहितो विशुद्ध लेश्या कः स्वस्वभावे रममाणो य आत्मा स एव चारित्रमस्ति। विगत स्पृहःशुद्ध संवरः समतावान् योद्वादशप्रकार तपसा कर्माणि निर्जरति स एवाऽऽत्मा तपः कथ्यते।

अनयारीत्याऽऽत्मानमेव नवपदमयं ज्ञात्वा भोभव्यजीवा! आत्मन्येवलीनचित्ताभवत। श्रीवीरजिन-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

राजन्नेतेषामेकैकं पदमपि महाप्रभावक मस्ति. यत एकैक पदाराधनेनाऽपिबहुजीवादेवनरसंबंधीन्युत्कृष्टसुखानि तीर्थंकर त्वं चप्राप्य मोक्षं प्राप्ताः। किंबहूक्तेन पृथ्वीश ? त्वमप्येतेषांपदानां परमभक्ति भावेनाऽऽगमिष्य-त्कालेऽत्रैवभरते पद्मनाभनामा प्रथम तीर्थंकरो भविष्यसि। तस्माद्भो पृथ्वीपालाद्या ? भव्यजिवा एतानि नवपदानि जिनधर्मस्य सर्वस्वं ज्ञात्वा विशुद्धभावेनाऽऽराधयत. य एतानि नवपदानि समाराधयन्ति तेषां सदा कल्याण समृद्धयो भवन्ति. इतिप्रोच्य गणधर विरते सति तं प्रणम्य समुतिष्ठन्तं श्रेणिकभूपंहृष्टमनाः कोऽपिपुरुषःप्रोवाच देव ? वीर विभोरागमनेनत्त्ववर्द्धाप्यसे. तन्निशम्य हर्षरोमांचितदेहः पृथ्वीपो यावत्तस्मै नराय पारितोषिकमदात्तावत्तत्रोद्याने वीरविभुः समागात् देवरचितसमवसरणेसमवसृतस्ततो गणेन्द्र देवेन्द्र नरेन्द्रादिषु यथास्थानं समुपविष्ठेषु श्रेणिकमुद्दिश्य भगवान् प्राह राजन्निदं नवपद माहात्म्यंतवचेतसि महाश्चर्यंकरोति. त्वयात्वेतेषांपदानां स्तोकमेव माहात्म्यं श्रुतमस्ति. एतेषामाराधनंतु सर्वेषां सुखानांमूल-मस्ति। नवपदाराधनस्यमूलं शुभोभावोऽस्ति, शुभभावश्च निर्मलचितानांप्राणिनांभवति. यैः प्राणिभिः संकल्पविकल्पांस्त्यक्त्वा स्वात्मानिर्मलश्चक्रे तेजीवा एव नव पदानिसन्ति (तेषुजीवेष्वेव नवपदानि



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मुखादेवंश्रुत्वाऽत्यंतानंदितचितःशन् भगवंतंप्रणम्य श्रेणिक पृथ्वीन्द्रः स्वावासंगतः। श्रीवीरजिनोऽपिसूर्यःकमल वनानीवभव्यजीवान् प्रतिबोधयन् पृथ्व्यामन्यत्र विजहार। इति श्री नवपद माहात्म्यप्रदर्शकं श्री श्रीपाल नरेन्द्र चरित्रं व्याख्या तणां श्रोतृणां च कल्याण मंगलं करोतु. निशम्यैवंभवक्लेश, नाशायकुरुतोद्यमम्; सर्वदुःखहरेनित्यं, सिद्धचक्रस्यसेवने॥१॥ बहिर्भ्येकच्छदेशस्थे, सुस्थल्याहूवेपुरेवरे; तीर्थेशघृतकल्लोल, पार्श्वे प्रासादशोभिते॥२॥ वेदशून्यखनेत्राऽब्द, आश्विनपूर्णिमा दिने; श्रीपालचरितंदृष्ट्वा, पूर्णीकृतंसुपुण्यकम्॥३॥ प्रगुरोर्मुनिमुख्यस्य, गौतमाब्धेःशुभाज्ञया; मयानीत्यब्धि शिष्येणो-पाध्यायेनगुणाब्धिना॥४॥ त्रिभिर्विशेषकम् प्रमादवशगेनाऽत्र, यत्किंचित्स्खलितंमया, संशोध्यंत द्विपश्चिद्भिः, क्षंतव्यंचक्षमापरः॥५॥

इतिश्री विधिपक्ष (अचल) गच्छ मुनिमंडलाग्रेसरस्य श्रेष्ठ चारित्रस्यतपोधनस्य श्री गौतमसागर मुनीश्वरस्यशिष्य स्यशान्तमूर्तेः श्री नीतिसागरमुनीश्वरस्य शिष्येणोपाध्यायेन गुणसागरगणिना कच्छदेशे सुथरीपुरे श्रीघृत-कल्लोलपार्श्वे जिनेश्वरसुप्रसादाद्रचितं श्री श्रीपाल चरित्रं विक्रमाच्चतुरधिक द्विसहस्त्र संवत्सर आश्विन पूर्णिमा शुभ-दिने संपूर्तिं मगात्। इदं चरित्रं यावत्पृथ्व्यां चंद्र सूर्यौस्त स्तावद्वाच्यमानं व्याख्यातृणां श्रोतृणां च मंगलं कूर्यात.



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

॥ इतिश्री श्रीपाल चरित्र संपूर्णम् ॥

પુસ્તકભંડાર

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust